ॐ

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला–नवम पुष्प

वास्तुशास्त्रविमर्श



श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-110016

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला–नवम पुष्प

वास्तुशास्त्रविमर्श

प्रधान सम्पादक
प्रो. रमेश कुमार पाण्डेय
कुलपतिः

सम्पादक
प्रो. देवीप्रसाद त्रिपाठी
आचार्य एवं अध्यक्ष

वास्तुशास्त्र विभाग
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ
(मानित विश्वविद्यालय)
नव देहली–११००१६

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

प्रकाशक–
वास्तुशास्त्र विभाग
श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ
(मानित विश्वविद्यालय)
कुतुब सांस्थानिक क्षेत्र, नई दिल्ली–११००१६

सन्दिर्भित शोधपत्रिका
ISSN :- 0976-4321

© प्रकाशक

संस्करण – २०१६

मूल्य २००/–

प्रकाशक की लिखित पूर्वानुमति के बिना इस ग्रन्थ के किसी भी अंश का अनुवाद या किसी भी रूप में उपयोग करना सर्वथा वर्जित है।

मुद्रक:
अमर प्रिंटिंग प्रैस
दिल्ली–११०००९
९८७१६९९५६५, ८८०२४५१२०८

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पुरोवाक्

भारतीय चिन्तन धारा सर्वदा ज्ञानान्वेषण हेतु अभिप्रेरित करती रही है। ज्ञान अक्षुण्ण एवं नित्य है परन्तु यह ज्ञान उस नवनीत के सदृश है, जो मूलरूप में तो दुग्ध में विद्यमान होता है, लेकिन उसकी प्राप्ति के लिए दुग्ध को दधि में परिवर्तित कर आलोडित करना पड़ता है। वेद न केवल भारत के, अपितु समस्त विश्व के ज्ञानकोश हैं। वेदों में निहित ज्ञान ही किसी न किसी रूप में आज भी इस सृष्टि में दृष्टिगोचर होता है। वेदों से ही अनेक शास्त्रों का प्रणयन हुआ है। वास्तुशास्त्र भी इन्हीं में से एक महत्त्वपूर्ण शास्त्र है। अथर्ववेद के उपवेद स्थापत्यवेद के रूप में प्राचीन काल से ही विद्वज्जनों में यह शास्त्र अत्यन्त समादृत रहा है। वेदों में वर्णित गृह, यज्ञशाला, पर्णशाला प्रभृति सुन्दर संरचनाएं वास्तुशास्त्र की प्राचीनता एवं उसके प्रति तत्कालीन समाज की अभिरुचि को अभिव्यक्त करती हैं। वैदिक-ऋषि ने वास्तोष्पति के रूप में गृह की चेतना तथा आध्यात्मिक स्वरूप को कल्याणप्रद मानकर उसकी उपासना की है। वे वास्तोष्पति से नित्य अभ्युदय चाहते हुए गृह एवं उसमें निवास करने वाले प्राणियों के कल्याण की कामना करते हैं।[1] वास्तुशास्त्र का शुल्वसूत्रों से बड़ा गहरा सम्बन्ध है, क्योंकि भवननिर्माण में भू-मापन एवं रेखाचित्रण का महत्वपूर्ण अवदान है। इसके लिए अत्यन्त निपुणता की आवश्यकता होती है। इसीलिए उत्तम शिल्पि व स्थपति के लक्षण को कात्यायन इस प्रकार कहते हैं-

संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः।
समभूमौ भवेद्विद्वान् शुल्बवित् परिपृच्छकः।।[2]

पुनः उनका कथन है-

शास्त्रबुद्ध्या विभागज्ञः परशास्त्रकुतूहलः।
शिल्पिभ्यः स्थपतिभ्यश्चाप्याददीत मतीः सदा।।[3]

---

1. द्रष्टव्य ऋग्वेद सं. 5/4/21/1-3
2. कात्यायन शुल्वसूत्र सप्तमीकण्डिका सूत्र 03
3. कात्यायन शुल्वसूत्र सप्तमी कण्डिका सूत्र 06

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मानव की मूलभूत आवश्यकताओं में भोजन एवं वस्त्र के उपरान्त निवास स्थान ही महत्त्वपूर्ण है। सर्वप्रथम मानव ने सुरक्षा की दृष्टि से पत्थर, लकडी इत्यादि को जोड़कर अपने लिए जिस आवास की परिकल्पना की, वही परिकल्पना कालक्रमानुसार नियमों व सिद्धान्तों में सुबद्ध होकर स्थापत्य या वास्तुशास्त्र के नाम से प्रसिद्ध हुई। वास्तुशास्त्र में दिशा एवं देश के अनुरूप गृहादि निर्माण की प्रविधियों के नियम विवेचित हैं। प्राकृतिक शक्तियों एवं पंचमहाभूतों के तारतम्य व उनके समुचित प्रबन्धन द्वारा प्राणिमात्र की शारीरिक एवं मानसिक क्षमताओं में वृद्धि करने, साथ ही प्राणिमात्र को स्वस्थ व गतिशील बनाये रखने के सदुद्देश्य से वास्तुनिर्माण के मानक सिद्धान्तों का प्रतिपादन वास्तुशास्त्र के प्राचीनाचार्यों ने किया है। वस्तुतः यह शास्त्र मानव की गृहादि सम्बन्धी भौतिक, बौद्धिक एवं आध्यात्मिक आवश्यकताओं को पूर्ण करने हेतु अस्तित्व में आया है।

प्राचीनकालीन चौंसठ कलाओं में भी वास्तुविद्या की परिगणना प्रतिमादि शिल्प के रूप में प्राप्त होती है।[4] आज भी वास्तुकला (आर्किटेक्चर) के रूप में यह विद्या विख्यात है। यह विद्या वास्तुकला के रूप में जहाँ एक ओर इसके भौतिक स्वरूप का प्रतिनिधित्व करती है, वहीं दूसरी ओर भौतिक स्वरूप के साथ साथ आध्यात्मिक स्वरूप को भी अभिव्यक्त करती है। जब तक कला, विज्ञान आदि भौतिक कार्य सुविचारों एवं आदिदैविक धारणाओं के द्वारा नियन्त्रित रहते हैं, तब तक वे जन कल्याणकरी होते हैं परन्तु जैसे ही ये कुविचारों द्वारा प्रभावित होने लगते हैं तो ये जगद्विध्वंसकारी भी बन जाते हैं। अतः कुविचारों पर नियन्त्रण के लिये सद्विचारों से परिपूरित आध्यात्मिक ज्ञान आवश्यक है। भौतिकता को आध्यात्मिकता से नियन्त्रण के सन्दर्भ में वास्तुशास्त्र में ही एक उदाहरण मिलता है कि शिवांशभूत वास्तुपुरुष भी अपेक्षित कार्य सम्पन्न करने के उपरान्त विश्वभक्षण के लिये उद्यत हुआ, जिसे शिवाज्ञा से पंचचत्वारिंशद् (45)देवगणों ने नियन्त्रित किया, इन्हीं देवगणों का वास्तुपुरुष पूजन के अवसर पर वास्तुमण्डल में अधिष्ठातृदेवों के रूप में पूजन होता है, जो नित्य वास्तु को नियन्त्रित कर कल्याण करते हैं। अतः पौराणिक मतानुसार शिव एवं अन्धकासुर संग्राम के समय शिव के स्वेदबिन्दु से वास्तुपुरुष की उत्पत्ति हुई है, जिसको पैंतालीस देवताओं ने पृथिवी पर अधोमुख कर स्थापित किया।[5] इसीलिए वास्तुपदविन्यास के पैंतालीस अधिष्ठातृदेव हैं, जो नित्य वास्तु

4. द्रष्टव्य शुक्रनीतिसार चतुर्थ अधयाय तृतीय प्रकरण एवं कामसूत्र प्रथम साधारणाधिकरण तृतीयाध्याय
5. मत्स्यपुराण अध्याय 252/5-14

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

का कल्याण करते हैं। अतः शास्त्रोक्तपद्धति के अनुसार गृहादिसंरचनाओं के निर्माण होने पर ही ये सुरक्षा एवं सुविधा प्रदान करने के साथ ही आध्यात्मिक उन्नति, सुख व शान्ति भी प्रदान करते हैं। यदि किसी कारण विशेष से गृहनिर्माण के कुछ नियमों का पालन नहीं हो पाता है तो किस प्रकार वास्तुदोष का शमन किया जाय? यह मार्ग भी शास्त्र ही प्रशस्त करता है, क्योंकि प्रसिद्ध है-

यथाबाणप्रहाराणां कवचं वारणं भवेत्।
तद्वदेवोपघातानां शान्तिर्भवति वारणम्।।[6]

वास्तुशास्त्र के मानकग्रन्थों, यथा-विश्वकर्मप्रकाश, मयमतम्, बृहत्संहिता, समरांगणसूत्रधार, अपराजितपृच्छा आदि, के विधिवत् पठन पाठन से ही प्राचीन भारतीय वास्तुशास्त्रीय सिद्धान्तों का सम्यक् ज्ञान हो सकता है। इसी उद्देश्य से वास्तुशास्त्र विभाग की स्थापना (सन् 2013) विद्यापीठ में की गई थी। अपनी स्थापना से अब तक के अल्पकाल में ही वास्तुशास्त्र विभाग शास्त्री, आचार्य, विशिष्टाचार्य, विद्यावारिधि, पी. जी. डिप्लोमा,एडवांस डिप्लोमा एवं प्रमाणपत्रीय डिप्लोमा पाठ्यक्रमों के सफलतापूर्वक संचालन के साथ ही विशिष्ट व्याख्यानों का आयोजन आदि अत्यन्त सराहनीय कार्य कर रहा है। इसी सातत्य में उत्तम शोधलेखों से विभूषित 'वास्तुशास्त्रविमर्श' नामक सन्दर्भित शोधपत्रिका का सम्पादन वास्तुशास्त्र विभाग के आचार्य एवं अध्यक्ष प्रो. देवीप्रसाद त्रिपाठी विगत वर्षों से बड़े मनोयोग से करते आ रहे हैं। सम्प्रति वास्तुशास्त्र विमर्श के इस नवम पुष्प को सुधी पाठकों के कर-कमलों में सादर समर्पित करते हुए अत्यन्त आनन्द का अनुभव हो रहा है। वास्तुशास्त्र विभाग इसी प्रकार आगे भी समाज की सेवा में अनवरत लगा रहे, इसी शुभकामना के साथ मैं प्रो. देवीप्रसाद त्रिपाठी एवं उनके सहयोगियों को इस महनीय कार्य के लिए साधुवाद देता हूँ। आशा है कि इस ज्ञानदीप के प्रकाश से आलोकित होकर वास्तुशास्त्र से सम्बन्धित कई अन्धविश्वास एवं समाज में व्याप्त भ्रम नष्ट होंगे। शमिति।

गुरुपूर्णिमा, वि.सं. 2073
दिनांक 19.07.2016

प्रो. रमेशकुमारपाण्डेय
कुलपति

---

6. भविष्यपुराण, 1/56/30

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सम्पादकीय

विश्वानि देवसवितर्दुरितानि परासुव, यद्भद्रं तन्न आसुव।।[1]

हे समस्त जगत के उत्पादक! समग्र ऐश्वर्य एवं सुखों के दाता सर्वशक्तिमान् सूर्यदेव! आप हमारे समस्त दु:खों एवं पापों को दूर कर जो कुछ भी अच्छा व कल्याणकारी हो, उसे हमें प्राप्त करवायें।

सूर्य अपनी किरणों से जिस प्रकार अन्धकार को दूर करता है, उसी प्रकार ज्ञान हमारे अन्त: करण में छिपे हुये अंधेरे को नष्ट कर देता है। अत: विद्वज्जन सर्वदा ज्ञान की उपासना करते हैं। ज्ञान की मुख्यत: दो शाखाएं हैं विद्या और अविद्या। विद्या आध्यात्मिक ज्ञान एवं अविद्या भौतिकज्ञान है, परन्तु दोनों के सम्मिश्रण से ही वास्तविक ज्ञान प्राप्त सकता है क्योंकि भौतिक व आध्यात्मिक ज्ञान पृथक् पृथक् रहने पर निष्फल हो जाता है। इसी कारण हमारे आचार्यों ने भौतिक व आध्यात्मिक दोनों से ही संपृक्त ज्ञान को श्रेयस्कर मानकर प्रत्येक शास्त्र को इन दोनों से आबद्ध किया है। यजुर्वेद के चालिसवें अध्याय में इस सन्दर्भ का बहुत सारगर्भित वर्णन उपलब्ध होता है। [2]

वास्तुशास्त्र के मुख्यत: तीन भेद होते हैं-स्थापत्य, शिल्प एवं चित्र । स्थापत्य कला अत्यन्त प्राचीन है। उत्तर वैदिक काल में स्थापत्य को उपवेद के रूप में प्रख्यात वैदिक ऋषि कात्यायन ने स्वीकार करते हुए कहा है कि **'...अथर्ववेदस्य स्थापत्यवेद उपवेद:।'**[3] वैदिक काल में स्थापत्य के अन्तर्गत नगरस्थापना, गृहस्थापना, प्रासादस्थापना एवं जलस्थापना का वर्णन मिलता है। उत्तरवर्ती काल में वास्तुशास्त्र के प्रख्यात आचार्य राजा भोजदेव ने अपने ग्रन्थ समरांगण सूत्रधार में भी वैदिक परम्परा का अनुशरण करते हुए स्थापत्य के चार प्रकार कहे हैं **'चतु:प्रकारं स्थापत्यम्.....'**।[4] चार प्रकार के स्थापत्य में नगर, मानव, देव एवं जलस्थापत्य का वर्णन मिलता है। इसी का विस्तार करते हुये पुन:

---

1. यजुर्वेद 30/03
2. यजुर्वेद 40/12
3. चरणव्यूह पृ. 71, चौखम्भा विद्याभवन वाराणसी, संस्करण -2001
4. सम.सूत्र. 10/77

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

समरांगणसूत्रधार कार ने पैंतालिसवें अध्याय में चार प्रकार के स्थापत्य को आठ अङ्गों में विभक्त किया है। यथा-

प्रोक्तं चतुर्धा स्थापत्यं वास्तुतत्वस्य सिद्धये ।
ब्रूमस्तदेव चेदानीमङ्गैः संयुक्तमष्टभिः ।।[5]

समरांगण सूत्रधार कार ने स्थापत्य के आठ अङ्गों को निम्नवत् व्याख्यायित किया है।[6] यथा-

1. **वास्तुपुरुषविकल्पना**-वास्तु पुरुष का सम्बन्ध वास्तुपद् विन्यास (साइट पलान) से है इसे ही वास्तुयोजना (रेखाचित्र निर्माण एवं प्लानिंग आफ हाउस) भी कहते है।

2. **पुरनिवेश**-पुरनिवेश के अन्तर्गत द्वारविन्यास, मार्गविन्यास, प्राकारनिवेश (रक्षाविधान), अट्टालकनिवेश, प्रतोलीनिवेश, जनभवननिवेश, देवायतननिवेश, पुरजनविहारस्थान आदि का वर्णन किया गया है।

3. **प्रासादनिवेश**-प्रासादनिवेश के अन्तर्गत मन्दिरनिर्माणादि प्रक्रिया का विवेचन और मन्दिर से सभी उपांगों के निवेश का वर्णन किया जाता है।

4. **ध्वजोच्छ्रति**-ध्वजोच्छ्रति का अभिप्राय इन्द्र ध्वज उत्थान से है।

5. **राजनिवेश**-राजप्रासाद से सम्बन्धित सभी भवन, जैसे- राजनिवास, रनिवास, राजदरवार, अश्वशाला, गजशाला आदि।

6. **जनभवन**-सभी वर्ण वर्ग के अनुरूप बसाई गई बसतियां एवं भवन आदि।

7. **यज्ञमण्डप**-यज्ञ में उपयोग आने वाले सभी विन्यास, जैस- यज्ञवेदी, यज्ञमानशाला आदि ।

8. **राजशिविर**-राजशिविर विन्यास एवं दुर्ग संरचना आदि।

समरांगणसूत्रधार[7] ने कहा है कि सभी प्रकार की स्थापना को व्यवस्थित करने के लिए स्थपति को वास्तुविद्या के आठ अङ्गों (१. सामुद्र २. गणित ३. ज्योतिष ४. छन्दस्

5. सम.सूत्र. 45/01
6. सम.सूत्र. 45/02-10
7. सम.सूत्र. 44/3-4

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

५. सिरा-ज्ञान ६. शिल्प ७. यन्त्र ८. कर्मविधि) का ज्ञाता होना चाहिए तभी वह वास्तुसम्मत स्थापत्य की स्थापना कर सकता है।

ब्राह्मण काल में शिल्प शब्द नृत्य गीत तथा वाद्य के लिए प्रयुक्त होता था यथा-**त्रिविधो शिल्पं, नृत्यं गीतं वादित्रमिति**[8] कालान्तर में नृत्यादि ललितकला के अन्तर्गत परिगणित होने लगे। रामायण में 'शिल्प' व 'कला' इन दोनों शब्दों को भिन्न-भिन्न अर्थों में प्रयुक्त किया गया है। यथा - **'नाना शिल्पकलाश्च'**[9]।

इस युग में शिल्पियों का प्रमुख कार्य यज्ञवेदियों का निर्माण करना[10] तथा मार्ग बनाना[11] था। कालान्तर में शिल्पियों के अन्तर्गत स्थपति (भवन-निर्माता), सूत्रग्राही (बढई), तक्षक (मूर्तिकार) और मृण्मर्मज्ञ (कुम्भकार) आदि भी गिने जाने लगे। ब्रह्मवैवर्त्तपुराण में विश्वकर्मा के नौ पुत्रों को 'शिल्पकारिणः' नाम से संबोधित किया गया है, जिनके नाम थे - १. मालाकार (माली) २. कर्मकार (लुहार) ३. शंखकार (शंख पर काम करने वाला) ४. कुविन्दक (कोरी या जुलाहा) ५. कुम्भकार (कुम्हार) ६. कांसकार (कसेरा) ७. सूत्रधार (बढ़ई) ८. चित्रकार और ९. स्वर्णकार (सुनार)। अग्निपुराण में एक सहस्र शिल्पों का निर्देश है और उन्हें जीविकोपार्जन का माध्यम बताया गया है[12]। इन पुराणग्रन्थों में चित्रकला को शिल्प का ही एक अंग मानकर उसका विस्तारपूर्वक विवेचन किया गया है।

संस्कृत के प्राचीन ग्रन्थों में प्रयुक्त 'शिल्प' शब्द अनेकार्थक है। पाणिनी ने अष्टाध्यायी में शिल्प शब्द को चारु (ललित) और कारु(उद्योग) दोनों के लिए प्रयोग किया है। आचार्य कौटिल्य ने अर्थशास्त्र के 'धर्मस्थीय' नामक अधिकरण में कारुक शिल्पियों की नामावली और उनके कार्यो की तालिका दी है।

ज्योतिषशास्त्र के त्रिस्कन्धमर्मज्ञ आचार्य वराहमिहिर द्वारारचित बृहत्संहिता के 53,56,57,58 और 79 अध्यायों में वास्तु, शिल्प और कला का सुन्दर विवेचन किया गया है। शिल्पशास्त्र से सम्बन्धित ग्रन्थों की संख्या अनुमानतः दो सौ से अधिक है। शिल्प के

---

8. कौषीतकी ब्रह्मण २९/५
9. रामायण १/३०१/५
10. रामायण ,बाल 14/25
11. रामायण बाल 79/13
12. अग्निपुराण 28/40-42-

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ग्रन्थों का उद्धार करने वाले विद्वानों में म. म. पं. गणपति शास्त्री का नाम उल्लेखनीय है। उनके द्वारा शिल्पशास्त्र पर सम्पादित ग्रन्थों के नाम हैं–1. वास्तुविद्या 2. मयमतम् 3. मनुष्यालयचन्द्रिका 4. शिल्परत्नम् और 5. समरांगणसूत्रधार । प्राचीन शिल्पशास्त्र के विधानों के अनुसार मूर्त्तियों का निर्माण करने वाले उडीसा के वर्तमान शिल्पकारों के पास आज भी अनेक महत्त्वपूर्ण हस्तलिखित ग्रन्थ इस विषय पर उपलब्ध होते हैं, जैसे– भुवनप्रवेश, शिल्पसदाजय, शिल्पशास्त्र आदि। म. म. पं. गौरीशंकर हीराचन्द ओझा जी की पुस्तक मध्यकालीन भारतीय संस्कृति में (पृ. 107,1951) 1. वास्तुसौख्य 2. अपराजित वास्तुशास्त्र 3. प्रासादानुकीर्तन, 4. चक्रशास्त्र, 5. चित्रपट, 6. जलार्गल, 7. पक्षिमनुष्यालयलक्षण 8. रथलक्षण 9. विमानविद्या 10. विमानलक्षण 11. विश्वकर्मीय 12. कौतुक लक्षण 13. मूर्तिलक्षण 14. प्रतिमाद्रव्यादि वचन 15. सकलाधिकार 16. सारस्वतीय समरांगण सूत्रधार 17. विश्वकर्मीयशिल्प आदि अनेक शिल्पविषयक ग्रन्थों की नामावली दी गई है।

द्विजेन्द्र नाथ शुक्ल जी ने भोज के समरांगण सूत्रधार पर शोधकार्य किया व उसे पांच खण्डों में प्रकाशित कराया। इस शोध प्रबन्ध में उन्होने शिल्पशास्त्र पर यथासंभव समस्त सामग्री का विश्लेषण किया है। इस ग्रन्थ के प्रथम खण्ड में उन्होंने शिल्पशास्त्र विषयक 194 ग्रन्थों की सूची प्रस्तुत की है। मानसार में 32 शिल्प के आचार्यों का उल्लेख हुआ है। शिल्प विषयक ग्रन्थों की रचना विश्वकर्मा से लेकर लगभग 16 वीं शताब्दी तक निरन्तर होती रही। श्री कुमार का 'शिल्परत्न' इस कड़ी का अन्तिम प्रौढ़ ग्रन्थ है, जिसकी रचना 16 वीं शताब्दी में हुई।

शिल्पग्रन्थों में वार्ता, शिल्प, व्यवसाय, राजनीति, धर्मशास्त्र, पशुपालन और अर्थशास्त्र आदि अनेक विषयों का एक साथ समन्वय है। इनमें से कुछ ग्रन्थों में चित्रकर्म पर भी चर्चायें प्राप्त होती है। उन ग्रन्थों में विश्वकर्मप्रकाश, मयमतम्, मानसार, चित्रसूत्र, चित्रलक्षण, चित्रकर्म, शिल्पशास्त्र, समराङ्गणसूत्रधार, कलाविलास, मानसोल्लास, वृतान्तप्रकरण और शिल्पकलादीपिका प्रमुख हैं। इनमें भी विष्णुधर्मोत्तरपुराण का चित्रसूत्र, नग्नजित् का 'चित्रलक्षण' भोज रचित 'समरांगणसूत्रधार' व सोमेश्वर का मानसोल्लास विशेष हैं। तिब्बत से प्रकाशित तजूर ग्रन्थमाला के 123 खण्डों में चार खण्ड शिल्पविषयक है। ये शिल्पसंबंधी चार ग्रन्थ है– 1. दशतलन्यग्रोध परिमण्डल बुद्ध प्रतिमा 2. संबुद्धभाषित प्रतिमालक्षण विवरण 3. प्रतिमामानलक्षण 4. चित्रलक्षण । चित्रकला पर चित्रलक्षण ही

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

प्रौढ रचना है। उसके मंगलाचरण में कहा गया है कि वह विश्वकर्मा और नग्नजित् द्वारा निर्दिष्ट लक्षणों का संग्रह है।

ऋग्वेद में भृगुऋषि के वंशजों को लकडी के काम का विशेषज्ञ बताया गया है, जिसका उपयोग वे अपने अवकाश के समय किया करते थे।[13] ऋग्वेद में चर्म पर अग्निदेव का चित्र अंकित किये जाने का उल्लेख प्राप्त होता है।[14] ऋग्वेद में विशाल(बृहत्तर), सुनहरी (हिरण्यमयी), द्वारदेवियों (द्वारादेवी:) को यज्ञशालाओं की चारों चोखट पर अंकित करने का वर्णन है।[15] यज्ञशालाओं के द्वारों पर स्वर्णांकित इन देवी आकृतियों को पाणिनी ने 'प्रतिकृति' कहा है। इन प्रतिकृतियों की पूजारी (अर्चावान्) पूजा करते थे और वे ही उनकी आजीविका का साधन थे इस संबध में ऋग्वेद की दो ऋचायें[16]बडे महत्व की हैं। इस प्रकार ऋग्वेद काल से ही कला के प्रमाण प्राप्त होते हैं। उपनिषदों में तो वर्णन है कि ब्रह्म की आनन्दमय सत्ता सोलह कलाओं द्वारा उद्भासित है- यह पृथिवी कला है, यह अन्तरिक्ष कला है, यह द्यु-लोक कला है, यह समुद्र कला है, अग्नि कला है, सूर्य कला है, विद्युत कला है[17], ब्रह्म का प्राण कला है, चक्षु कला है, श्रोत्र कला है और मन भी कला है[18]। विद्यारण्य मुनि रचित पञ्चदशी वेदान्त दर्शन की महानतम कृति के रुप में विश्रुत है। इस ग्रन्थ के 'चित्रदीप' संज्ञक छठे प्रकरण में चित्रशास्त्र के विधानों के अनुसार ब्रह्मतत्व पर विचार किया गया है, उन्होंने वेदान्त के गूढतम सिद्धान्तों को समझाने के लिए चित्रकला जैसे माध्यम को अपनाया है। भारतीय दृष्टिकोण के अनुसार कला, कला के लिए नहीं है, उसका उद्देश्य तो मनुष्य को अपने आप में सीमित न रखकर उसे परम तत्व की ओर ले जाना है। जिससे परमानन्द प्राप्ति हो सके वही श्रेष्ठ कला है।

विश्रान्तिर्यस्य सम्भोगे सा कला न कला परा।
लीयते परमानन्दे ययात्मा सा परा कला॥[19]

इस प्रकार चित्रकला की परम्परा वैदिककाल से प्रारम्भ होकर विकसित होती गई। जिसका उत्तरोत्तर साहित्य में विस्तार प्राप्त होता है। रामायण व महाभारत काल तक चित्र,

13. ऋग्. 10/39/14
14. ऋग्. 1/1/45
15. ऋग्. 1/1/5
16. (9/5/5) (10/110/5)
17. छान्दोग्य 4/5/2 4/7/3
18. छान्दोग्य 4/8/3
19. उद्धृत भारतीय चित्रकला, वाचस्पति गैरोला, पृ. सं. 77

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

स्थापत्य एवं शिल्पकला के विभिन्न अंगों का अनेक उपांगों में पूर्ण विकास हो चुका था। इसी परम्परा में पुराणों (हरिवंश, अग्नि, मत्स्य, स्कन्ध, गरुड, पद्म, विष्णुधर्मोत्तर आदि), अष्टाध्यायी, अर्थशास्त्र, नाट्यशास्त्र कालिदास की रचनाओं, कामसूत्र, बृहत्संहिता, कादम्बरी, हर्षचरित, दशकुमारचरित, कुट्टनीमत, तिलकमञ्जरी, कथासरित्सागर, काव्यप्रकाश एवं नैषधचरित आदि में इनका उत्तरोत्तर विकास दृष्टिगोचर होता है।

संस्कृत साहित्य की परम्परा के अतिरिक्त यदि पुरातात्विक अवशेषों के आधार पर विचार किया जाय तो स्पेन, फ्रांस, दक्षिण रोडेशिया, पेरु, अलास्का, लौसेक्स और भारत आदि संसार के विभिन्न देशों में आदि युग की चित्रांकित गुफायें प्राप्त हुई हैं। प्रागैतिहासिक मानव ने किस प्रकार अपनी संस्कृति, सभ्यता और भाव-विचारों का विकास किया, इन चित्रों के माध्यम से वे तथ्य प्रकाश में आ चुके हैं। भारत में मध्यप्रदेश के आदमगढ, भीमबैठका, रायगढ, बिहार के चक्रधरपुर, सिहंनपुर, होशंगाबाद और मिर्जापुर के लिखुनिआं, कोहर तथा भल्डरिया आदि स्थानों से ये चित्र प्राप्त हुए हैं। ये चित्र नाना प्रकार के हैं। जैसे -हाथी, चीता,बाघ, रीछ, वराह, हरिण आदिका आखेट करते हुए मनुष्य, धनुष बाण को लेकर दो दलों में संघर्ष, पशु चराते चरवाहे, बैल, घोडे, कुत्ते, बकरी, गभिर्णी गाय, छत्ते से मधु निकालते हुए मानव आदि अनेक चित्र हैं। इसके उपरान्त भारत में सिन्धु नदी घाटी सभ्यता में शिलाओं, मृत्तिकापात्रों पर अंकित फूल, पत्ती, जीव-जन्तुओं तथा मानव की कलाकृतियां प्राप्त होती हैं। सिन्धु घाटी की चित्रमय मुहरें भारतीय कला के प्रथम जीवित प्रमाण हैं। हडप्पा और मोहनजोदडों से प्राप्त कांसे की तन्वंगी नर्तकी प्रस्तरीय धड़, वृषभ और वह मुहर जिस पर पशुओं के बीच त्रिशूलधारी मानव आसन लगाकर बैठा है, ये सभी अतीतकालीन भारत की कला के प्रति अभिरुचि के अमिट प्रमाण हैं। प्राचीन समय में लिपियों का विकास भी चित्रों से ही आरम्भ हुआ। सिन्धु घाटी की लिपि भी पूर्ण रूप से चित्रमय है। आज भी चीन की भाषा चित्ररूप में ही लिखी जाती है। इस प्रकार मनुष्य की चित्ररूप में भावाभिव्यक्ति प्राचीनतम भी है व अद्यतन भी। आज चित्रों का विशाल संसार हमारे चारों ओर विद्यमान है। जो कि आने वाले समय में और भी विस्तार को प्राप्त होगा। सभी कलाओं में चित्रकला को बहुत से आचार्यों ने सर्वोत्तम स्थान प्रदान किया है। भारतीय समग्र ज्ञान का मापन पुरुषार्थ चतुष्टय के ध रातल में ही किया जाता है।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भारतीय चिन्तन में कोई भी शास्त्र, कला या विज्ञान पुरुषार्थ चतुष्टय के विना ग्राह्य एवं पठनीय नहीं होता। भारतीय समाज में चित्रों का सर्वाधिक महत्त्व है गृहों की सजावट एवं धार्मिक क्रिया कलाप में चित्रों के विना कुछ भी सम्भव नहीं है। इसी को आधार मानते हुये अनुमानतः वास्तुशास्त्र के आचार्यों ने अपने मानक ग्रन्थों में वास्तुसज्जा के रूप में योज्यायोज्य के नाम से स्वतन्त्र अध्याय में गृहों एवं देवालयों में चित्रों को लगाने के शुभाशुभ का विचार किया है। विष्णुधर्मोत्तरपुराण के चित्रसूत्र प्रकरण में वर्णन मिलता है कि कलाओं में चित्रकला सर्वोत्तम है। चित्रकला की साधना से धर्म, अर्थ, काम एवं मोक्ष रूपी सभी पुषार्थो की प्राप्ति होती है। घरों एवं पूजास्थलों में चित्रलेखन एवं चित्रसंयोजन के अतिरिक्त मंगलकामना करना असम्भवसा प्रतीत होता है। यथा-

कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम्।
मांगल्यं प्रथमं ह्येतद् गृहे यत्र प्रतिष्ठितम्।।[20]

अतः स्पष्ट होता है कि प्राचीनकाल से ही वास्तुशास्त्र भारतीय समाज में अत्यन्त सम्मानित रहा है। जीवन को सुव्यवस्थित एवं सुसंस्कृत बनाने में वास्तु रूपी विज्ञान एवं कला का सर्वाधिक योगदान रहा है। वास्तुशास्त्रानुरूप निर्मित उत्तम गृहादि ही सुख-समृद्धि एवं चतुर्वर्गफल प्राप्ति में सहायक होता है। योग्य एवं कुशलस्थपति के विना गृह में आनन्द, स्फूर्ति, कार्यक्षमता, सुख, शान्ति की कामना करना व्यर्थ है। सम्प्रति समाज में सम्यक् शास्त्रीय स्थपतियों का अभाव सर्वत्र दिखाई देता है। सैद्धान्तिक पक्ष में निपुण वास्तुशास्त्री व्यावहारिक पक्ष से अधिकांशतः अपरिचित होते हैं तथा क्रियापक्ष में निपुण शिल्पी प्रायः कला के सैद्धान्तिक पक्ष से अनभिज्ञ होते हैं। सम्प्रति संस्कृतभाषा में निबद्ध वास्तुशास्त्र के मानकग्रन्थों का अध्ययन एवं प्रचार-प्रसार प्रायः समाज में नहीं दिखाई देता है। इसी लिए इस शास्त्र के सम्यक् शास्त्रीय ज्ञानाभाव के कारण समाज को भयंकर परिणाम भुगतने पड़ रहे हैं। इस शास्त्र के सैद्धान्तिक एवं प्रायोगिक दोनों पक्षों के अध्ययन अध्यापन में श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ (मानित विश्वविद्यालय) का वास्तुशास्त्र विभाग निरन्तर क्रियाशील है। इसी दृष्टि से विद्वानों शोधार्थियों एवं जिज्ञासुओं के निबन्धों से सुसज्जित **वास्तुशास्त्रविमर्श** का प्रकाशन विगत कई वर्षो से विभाग द्वारा अनवरत किया जा रहा है।

---

20. चित्रसूत्रम् 43/38 उद्धृत भारतीय चित्रकला, भूमिका वाचस्पति गैरोला, पृ. सं. 13

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इस **वास्तुशास्त्र विमर्श** के नवम पुष्प के प्रकाशन के शुभावसर पर मैं सर्वप्रथम संस्कृत व संस्कृति के संरक्षक परमश्रद्धेय यशस्वी कुलपति महोदय प्रो. रमेशकुमार पाण्डेय जी को सादर अभिनन्दन पूर्वक कृतज्ञता प्रकट करता हूँ, जिनके सन्मार्गनिर्देशन एवं संरक्षकत्व में वास्तुशास्त्र विभाग का यह पुष्प सुधी पाठकों के करकमलों में समर्पित है। इस अवसर पर मैं पुण्यस्मरण पूर्व कुलपति स्व. प्रो. वाचस्पति उपाध्याय जी एवं पूर्व ज्योतिषविभागाध्यक्ष स्व. प्रो. शुकदेव चतुर्वेदी जी को श्रद्धासुमन समर्पित करता हूँ, जिनके शुभाशीर्वाद से वास्तुशास्त्रविभाग पल्लवित एवं पुष्पित हो रहा है। इस प्रकाशन कार्य में कुशल प्रशासक कुलसचिव डॉ. विजयकुमार महापात्र का सराहनीय योगदान रहा है, एतदर्थ मैं उन्हें कृतज्ञता पूर्वक धन्यवाद देता हूँ। इसी सन्दर्भ में शोध एवं प्रकाशन समिति के सदस्यों (त्रिस्कन्धज्योतिषशास्त्र के मूर्धन्यविद्वान् प्रो. ओंकारनाथ चतुर्वेदी, पं. रामदेव झा एवं ज्योतिष विभाग के डॉ. सुशीलकुमार डॉ. रश्मिचतुर्वेदी) तथा अन्य विभागीय समस्त विद्वानों को भी हार्दिक धन्यवाद प्रदान करता हूँ, जिनके सत्परामर्श एवं सहयोग से **वास्तुशास्त्रविमर्श** का यह पुष्प प्रकाशित हो सका। मुद्रणकार्य हेतु अमर प्रिंटिंग प्रेस एवं अन्य सभी सहयोगी सुहृदजनों का हार्दिक आभार प्रकट करता हूँ। शमिति।

प्रो. देवीप्रसाद त्रिपाठी
अध्यक्ष वास्तुशास्त्रविभाग

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शोध एवं प्रकाशन समिति

1.	प्रो. देवीप्रसाद त्रिपाठी, वास्तुशास्त्र विभागाध्यक्ष	अध्यक्ष
2.	प्रो. ओंकारनाथ चतुर्वेदी	सदस्य
3.	प्रो. रामदेव झा	सदस्य
4.	डॉ. सुशील कुमार	सदस्य
5.	डॉ. रश्मि चतुर्वेदी	सदस्य

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

विषयानुक्रमणिका

1. नाट्यगृहशिल्पविधानम्	**प्रो. हंसधरझा** आचार्योऽध्यक्षश्च, ज्योतिषविभागः राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः (म.प्र.)	1-6
2. गृह्यसूत्रेषु वास्तुशान्तिविधानम्	**डॉ. मुष्टि वेंकटनागपवनकुमारशर्मा** सहाचार्य आपस्तम्बपौरोहित्यविभागः, श्रीवेंकटेश्वरवेदविश्वविद्यालयः, तिरुपतिः (आ.प्र.)	7-11
3. देवप्रासादविज्ञानम्	**डॉ. देशबन्धुः** सहायकाचार्यः, संस्कृतविभागः, डॉ. भीमरावअम्बेडकरविश्वविद्यालयः, आगरा (उ.प्र.)	12-18
4. वास्तुनि दार्शनिकतत्त्वानि	**डॉ. सच्चिदानन्दस्नेही** सहायकाचार्यः (सर्वदर्शनम्), ज.ना.ब्र.आदर्शसंस्कृतमहाविद्यालयः, लगमा, रामभद्रपुरम्, दरभंगा, (बिहार)	19-27
5. भूखण्डीकरणविधिः	**डॉ. मुरलीकृष्ण टि.** अं.का.शिक्षक, रा.सं.संस्थान्, राजीवगान्धीपरिसरम्, (कर्नाटकः) शृंगेरी	28-31
6. पिण्डसाधनविमर्श	**डॉ. गणेशत्रिपाठी** शोधच्छात्रः, काशीहिन्दू विश्वविद्यालयः, वाराणसी (उ.प्र.)	32-35
7. वैदिकवाङ्मये वास्तुविद्यायाः दिग्दर्शनम्	**श्री शिवप्रसादरैना** शोधच्छात्रः, श्रीला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली-16	36-44
8. जीर्णादिशिवलिङ्गन्यासविधानम्	**श्रीविजयकुमारः** शोधच्छात्रः, रा.सं.संस्थानम्, भोपालः परिसरः, भोपालः (म.प्र.)	45-61

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

9. ग्रामविन्यासः	**श्री गणेशदत्तचतुर्वेदी** शोधच्छात्रः, श्रीला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली-16	62-44
10. मनुष्यालयचन्द्रिका : ग्रन्थविमर्शः	**श्री दीपकवशिष्ठः** शोधच्छात्रः, श्रीला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली-16	75-80
11. भूगर्भस्थजलान्वेषणविधिः	**श्रीनवीनपाण्डेयः** शोधच्छात्रः, श्रीला.ब.शा.रा.सं.विद्यापीठम्, नवदेहली-16	81-93
12. वनस्पतिमहत्त्वम्	**डॉ. रामबाबूपाण्डेयः** आ. तु. सर्वोदयविद्यालयः, छत्तरपुरम् नवदेहली	94-99
13. दिनमान	**पं.देवनारायण झा** सेवानिवृत्त अध्यापक, झिटकहिया, मुजफ्फरपुर, बिहार	100-104
14. सांस्कृतिक धरोहर एवं परिवर्तन	**डॉ. वागीश शर्मा 'दिनकर'** प्राचार्य, आर.एस.एस.(पी.जी.) कॉलेज, पिलखुवा, हापुड़ (उ.प्र.)	105-112
15. वास्तुशास्त्र की वैज्ञानिक पृष्ठभूमि	**डॉ. अशोक थपलियाल** सहायकाचार्य, ज्योतिषविभाग, रा.सं.संस्थान, श्रीरघुनाथकीर्तिपरिसर, देवप्रयाग, उत्तराखण्ड	113-119
16. वास्तुसौख्यम् : ग्रन्थविमर्श	**डॉ. प्रवेश व्यास** अं.का.शिक्षक, रा.सं.संस्थान, जयपुर परिसर, जयपुर, राजस्थान	120-127
17. कुण्ड-मण्डप का वास्तुशास्त्रीय स्वरूप	**डॉ. रामेश्वर दयाल शर्मा** अं.का.शिक्षक, रा.सं.संस्थान, जयपुर परिसर, जयपुर, राजस्थान	128-135

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

18. दिग्ज्ञान	**डॉ. सुरेश शर्मा**, संविदा अध्यापक, श्री माता वैष्णो देवी गुरुकुल, कटरा, जम्मू	136-139
19. वास्तुसम्मत शयनकक्ष	**डॉ. रीतिका जैन** **श्री योगेन्द्रशर्मा** शोधच्छात्र, श्रीला.ब.शा.रा.सं.विद्यापीठ, नई दिल्ली	140-154
20. शिशुपालवध महाकाव्य में वास्तुशास्त्रीय चिन्तन	**श्री पीयूष पाण्डेय** शोधच्छात्र दिल्ली विश्वविद्यालय, दिल्ली	155-158
21. मापन विधान	**श्री कन्हैया कुमार झा** शोधच्छात्र, श्रीला.ब.शा.रा.सं.विद्यापीठ, नई दिल्ली	159-164
22. शिक्षण में वास्तुशास्त्र का वैशिष्ट्य	**श्री वीरेन्द्र सिंह चौधरी** शोधच्छात्र, राजस्थान विश्वविद्यालय, जयपुर	165-172
23. देवीप्रतिमा विमर्श	**कु. रितिका अग्रवाल** शोधच्छात्र, श्रीला.ब.शा.रा.सं.विद्यापीठ, नई दिल्ली	173-180
24. Energy conservation and open spaces in Building	**डॉ. मुनीष शर्मा** सहाचार्य, कालेज ऑफ आर्किटेक्चर, आई.ई.टी., भड्डल, रोपर, पंजाब	181-188

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

नाट्यगृहशिल्पविधानम्

प्रो. हंसधरझाः

'इहादिर्नाट्ययोगस्य नाट्यमण्डप उच्यते'।[1] श्लोकार्धेऽस्मिन् नाट्यप्रसङ्गे नाट्यगृहस्य प्राथम्यं प्रतिपादितम् भरतमुनिना। नाट्यशास्त्रे हि द्वितीयाध्याये विशेषेण नाट्यगृहविषयकं विवेचनं कृतं भरतेन। तत्र मुख्यरूपेण विकृष्टं चतुरस्रं त्र्यस्रं चेति त्रिविधं नाट्यगृहं प्रतिपादिम्। यथा-

त्रिविधः सन्निवेशश्च शास्त्रतः परिकल्पितः।
विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु मण्डपः।।[2]

तत्प्रत्येकमपि ज्येष्ठमध्यमकनिष्ठभेदैस्त्रिविधाम्। यथा-

तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम्।
प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम्।।[3]

एवं नवविधेषु नाट्यगृहेषु विकृष्ट-चतुरस्र-त्र्यस्र-नाट्यगृहाणामेकैकस्य प्रकारस्य वर्णनमुपलभ्यते नाट्यशास्त्रे। तत्र विकृष्टनाट्यगृहं वर्णयता भरतेन लिखितं यदस्य पूर्वापरं दैर्ध्यं चतुःषष्टिहस्तमितं, दक्षिणोत्तरा च विस्तृतिर्द्वात्रिंशद्धस्तमिता भवेत्। तद् यथा-

चतुःषष्टिकरान्कुर्याद् दीर्घत्वेन तु मण्डपम्।
द्वात्रिंशतं च विस्तारान् मर्त्यानां यो भवेदिह।।[4]

एवमुपर्युक्तदैर्ध्यविस्तारपरिमितभूमौ सर्वप्रथमं शास्त्रोक्तविधानेन खातं कृत्वा ततः शिलान्यासं भित्तिं च विधाय स्तम्भस्थापनं कुर्यादित्युक्तम्। यथा-

भित्तिकर्माणि निर्वृत्ते स्तम्भानां स्थापनं ततः।[5]

एवं नाट्यगृहभूमेराग्नेय्यादिषु चतुर्षु कोणेषु चत्वारो दृढाः स्तम्भा ब्राह्मण-क्षत्रिय-वैश्य-शूद्रसंज्ञकाः स्थापयितुं निर्दिष्टाः। तेषु च स्तम्भेषु क्रमशः श्वेत-रक्त-पीत-नीलपदार्थानामुपयोगो भवतिस्म। यथा[6]-

---

1. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 3
2. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 8
3. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 9
4. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 20
5. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 50

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

प्रथमे ब्राह्मणस्तम्भे सर्पिः सर्षपसंस्कृते।
सर्वशुक्लो विधिः कार्यो दद्यात्पायसमेव च॥

ततश्च क्षत्रियस्तम्भे वस्त्रमाल्यानुलेपनम्।
सर्वं रक्तं प्रदातव्यं द्विजेभ्यश्च गुडौदनम्॥

वैश्यस्तम्भे विधिः कार्यो दिग्भागे पश्चिमोत्तरे।
सर्वं पीतं प्रदातव्यं द्विजेभ्यश्च घृतौदनम्॥

शूद्रस्तम्भे विधिः कार्यः सम्यक् पूर्वोत्तराश्रये।
नीलप्रायं प्रयत्नेन कृशरा च द्विजाशनम्॥

अपि च -

पूर्वोक्तब्राह्मणस्तम्भे शुक्लमाल्यानुलेपने।
निक्षिपेत्कनकं मूले कर्णाभरणसंश्रयम्॥

ताम्रं चाधः प्रदातव्यं स्तम्भे क्षत्रियसंज्ञके।
वैश्यस्तम्भस्य मूले तु रजतं सम्प्रदापयेत्॥

शूद्रस्तम्भस्य मूले तु दद्यादायसमेव च।
शेषेष्वपि च निक्षेप्यं स्तम्भमूले तु काञ्चनम्॥

अत्र ध्यातव्यमिदमस्ति यन्नाट्यगृहनिर्माणेक्रमे आचार्यभरतेन तत्सर्वमपि नियमपालनं निर्दिष्टं यत् खलु वास्तुरचनाक्रमे ज्यौतिषशास्त्रीयं विधानमपेक्षितं भवति। एवं विहितसूत्रेण विहितमुहूर्तेषु खातखननं शिलान्यासं भित्तिनिर्माणञ्च विधाय पूर्वोक्तस्य समग्रस्य क्षेत्रस्य पूर्वापरं भागद्वयं विधेयम्। तत्र यः पूर्वार्धभागः स प्रेक्षकाणामुपवेशनाय प्रेक्षागृहत्वेन व्यवस्थापितः। अपरार्धभागश्च योऽवशिष्टस्तस्य पुनः पूर्वापरं भागद्वयं विधाय तत्र पश्चिमार्धे नेपथ्यगृहं निर्धारितम्। भागस्यास्योपयोगः पात्राणां कृते वेशभूषोपयोगार्थं भवति स्म। अथ च नेपथ्यञ्च प्रेक्षागृहञ्चान्तरा योऽवशिष्टो भागस्तस्यापि पूर्वापरौ समौ विभागौ विधाय, तत्र प्रेक्षागृहसंलग्नभागस्योभयपार्श्वतः अष्टहस्तात्मकौ चतुस्रभागौ विहाय मध्ये योऽवशिष्टः षोडशाष्टहस्तपरिमितदैर्ध्य-विस्तारविशिष्ट आयताकारको भागः रङ्गपीठत्वेन निर्दिष्टः। अथ च नेपथ्यभागसंलग्नमवशिष्टं भागं त्रिधा विभज्य मध्यभागेऽष्टहस्तात्मके चतुरङ्गेरङ्गशीर्षस्य कल्पनास्ति। रङ्गशीर्ष रङ्गपीठञ्चोभेऽपि नटवर्गाय नाट्यप्रयोगप्रदर्शनार्थं व्यवस्थापिते आस्ताम्। यथा-

चतुःषष्टिकरान कृत्वा द्विधा कुर्यात्पुनश्च तान्।
पृष्ठतो यो भवेद् भागो द्विधाभूतस्य तस्य तु ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सममर्धविभागेन रङ्गशीर्षं प्रकल्पयेत्।

पश्चिमे च विभागेऽथ नेपथ्यगृहमादिशेत्।
विभज्य भागान् विधिवद् यथावदनुपूर्वशः।।[7]

रङ्गपीठस्योभयतो यौ चतुरस्रौ तयोश्चतुर्षु कोणेषु चत्वारश्चत्वारः स्तम्भा निर्मीयन्ते स्म। यथा- **चतुःस्तम्भसमायुक्ता वेदिकायास्तु पार्श्वतः।**[8] स्तम्भा एते विशेषेणोन्नता भवन्ति स्म। एतेषामुपरि गजपरिष्टोम (हौदा) इव सूच्याग्रस्तम्भा भवन्ति स्म। भागद्वयमिदं मत्तवारिणीपदेनाख्यातम्। यथा-

रङ्गशीर्षस्य पार्श्वे तु कर्तव्या मत्तवारणी।
चतुःस्तम्भसमायुक्ता रङ्गपीठप्रमाणतः।।[9]

अनयोरुपयोगः कक्ष्यारूपेण भवति स्म। मत्तवारिण्योराधारभूमी रङ्गपीठञ्चेत्युभेऽपि सम्मुखस्थप्रेक्षागृहभूमितः सार्धैकहस्तमिते उन्नते भवेतामित्युक्तं नाट्यशास्त्रे। यथा-

अध्यर्धहस्तोत्सेधेन कर्तव्या मत्तवारिणी।
उत्सेधेन तयोस्तुल्यं कर्तव्यं रङ्गमण्डपम्।।[10]

अथ च नेपथ्यभूमिं रङ्गपीठं चान्तरा रङ्गशीर्षाख्यको भागो भवित स्म, यत्र हि षड्दारुमयाः स्तम्भा भवन्ति स्म। एतत्स्तम्भविषये विवेचयताऽभिनवगुप्तेन लिखितं यत्- **'नेपथ्यभित्तिलग्नौ स्तम्भौ अष्टहस्तान्तरावन्योन्यं निवेश्य तयोस्सम्मुखं तदपेक्षया चतुर्हस्तान्तरं स्तम्भद्वयं तेषामधस्तनं कार्यं स्तम्भद्वयमिति षट'।**[11] अर्थाद्रङ्गशीर्षस्य चतुर्षु कोणेषु चत्वारः स्तम्भा भवन्ति स्म। तथा तत्रोभयपक्षयोः स्थितयोर्द्वयोरपि स्तम्भयोः साक्षान्मध्यभागयोरेकैकः स्तम्भो भवति स्म। मन्ये एतन्निर्दिष्टयोः स्तम्भयोस्तथा नेपथ्यसंलग्नयोः स्तम्भयोः सहाय्येन मृच्छकटिकवर्णितोद्दामच्छदिः, अथवा रत्नावल्यां निर्दिष्टप्रासाद इत्यादिकस्य प्रदर्शनं क्रियते स्म। अथवा भागाविमौ पीठस्य साक्षात्पृष्ठस्थित्वात् प्रसङ्गवशादत्रैव तिरस्करणीं प्रयुज्यैककालावच्छेदन भिन्नो भिन्नो द्वौ प्रसङ्गौ प्रदर्श्येते स्म। यथा भवभूतेरुत्तररामचरिते एकस्मिन्नेव काले रामवासन्त्योस्तथा सीतातमसयोः पृथक्-पृथक् पारस्परिकवार्तालापयोः प्रसङ्गौ स्तः। मन्ये, एवम्भूतयोः प्रदर्शनमत्रोभयोर्भागयोरेकस्मिन्नेव काले क्रियते स्म, येन तौ द्वापि युग्मौ परस्परदृष्टौ न स्याताम्, परं प्रेक्षकाणां दृष्टगौ भवेतामिति। अथ चात्र रङ्गशीर्षस्य भूमिरन्यभागापेक्षया किञ्चिदुन्नता भवति स्म।

---

6. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 53-59
7. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 40-42
8. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 105
9. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 70
10. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 71
11. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 39

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

समुन्नतं समञ्चैव रङ्गशीर्ष तु कारयेत्।
विकृष्टेरून्नतं कार्यं चतुस्त्रां समं तथा।।[12]

एवम्मध्यमनाट्यगृहेऽत्र द्वाराणि पञ्च भवन्ति स्म, यत्रैकं प्रेक्षकाणां प्रवेशायापराणि च नाट्यपात्राणां प्रवेशाय भवन्ति स्म। एवमत्र भरतमुनिप्रतिपादितं मध्यमविकृष्टनाट्यगृहं समासेन प्रतिपादितम्। तत्र ज्येष्ठविकृष्टनाट्यगृहस्य दैर्ध्यं ह्यष्टोत्तरशतमितं तथा कनिष्ठविकृष्टनाट्यगृहस्य द्वात्रिंशद्धस्तमितं कथितम्। तद् यथा

अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम्।
कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदिष्यते।।[13]

मण्डपस्य विशालाधिक्ये सति प्रेक्षका बहुविधदृष्टिभेदान् प्रयान्ति, नैव च पाठमेव सम्यक्तया श्रोष्यन्तीति धियाऽचार्येण भरतमुनिना मध्यमप्रकारस्य नाट्यगृहस्य प्राधान्यं प्रतिपादितम्। यथा–

प्रेक्षागृहाणां सर्वेषां तस्मान् मध्यममिष्यते।
यावत्पाठ्यं च गेयं च तत्र श्रव्यतरं भवेत्।।[14]

अथ च विकृष्टस्येव चतुरस्रस्यापि नाट्यगृहस्याष्टोत्तरशतादिहस्तभेदेन त्रिविधत्वं प्रतिपादितं भारते नाट्यशास्त्रे। तत्र त्रयाणां प्रकाराणां मध्ये द्वात्रिंशद्धस्तात्मकस्य समचतुरस्रस्य कनिष्ठाख्यस्य नाट्यगृहस्य वर्णनं प्राप्यते। यथा–

अष्टहस्तं तु कर्तव्यं रङ्गपीठं प्रमाणतः।
चतुरस्त्रं समतलं वेदिकासमलङ्कृतम्।।[15]

एवं नाट्यगृहस्यास्य वर्णनक्रमे भरतस्याभिप्रायं स्पष्टीकुर्वद्भिर्विविधटीकाकारैर्वैविध्यं प्रतिपादितम्। तत्राभिनवगुप्तेनोल्लिखितं वार्तिककारश्रीशङ्कुकमतमत्र विविच्यते। श्रीशङ्कुकः कथयति– 'अष्टाभिर्भागैः सर्वतःक्षेत्रं विभज्यते येन चतुरङ्गफलकवत् चतुःषष्टिकोष्ठं भवति। तत्र मध्यमकोष्ठचतुष्के रङ्गपीठं सर्वतोऽष्टहस्तम्। तस्य पश्चिमे भागे प्राक्पश्चिममेव द्वादशहस्तं दक्षिणोत्तरे द्वात्रिंशतत्करं क्षेत्रमवशिष्यते। यद् रङ्गपीठत्वेन स्वीकृतं तद् द्विहस्ताष्टकमेव। यदवशिष्टं क्षेत्रं तन्मध्याद्रङ्गपीठनिकटगतं प्राक्पश्चिमतश्चतुर्हस्तं, विस्तारेण द्वात्रिंशद्धस्तं क्षेत्रम्। तस्माद् विभज्यते तावत्प्रमाणम्। एवं पश्चिमभागेऽपि विभज्य रङ्गशीर्षकसंस्थानं रङ्गशिरः कुर्यात्। ततोऽपि पश्चिमे नेपथ्यगृहम्' इति।[16] एवं निर्धारिते

---

12. भरतनाट्यशास्त्रम्, अध्याय, 22, पृष्ठ 41
13. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 10
14. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 24
15. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 104
16. भरतनाट्यशास्त्रम्, अध्याय, 22, (गो.बा.के) पृष्ठ 42

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पीठादिके रङ्गपीठस्य चतसृषु दिक्षु दशानां स्तम्भानां स्थापनं कर्तव्यमिति भरतस्याभिप्रायं स्पष्टीकुर्वता श्रीशङ्कुकेन लिखितं यत्- **'कोणचतुष्टये तावच्चत्वारः। तत्राग्नेयस्तम्भाच्चतुर्हस्तान्तरो दक्षिणः स्तम्भः। तथैव नैऋतस्तम्भाद्द्वितीयः। एवमुदीच्यामपि स्तम्भद्वयम्। पूर्वभागे आग्नेयेशानदिग्गतात् स्तम्भद्वयाच्चतुर्हस्तान्तरं स्तम्भद्वयमिति षट्। कोणगाश्चत्वार इति दश। एतद् बहिः सामाजिकानामासनानि'** इति।[17] एवं स्थापितेषु दशसु स्तम्भेषु पुनश्चतुर्दशानां स्तम्भानां स्थापनमभीष्टं भरतस्य। तत्र प्रथमं षण्णां स्तम्भानां स्थापनं श्रीशङ्कुकेन निम्नलिखितप्रकारेण स्पष्टीकृतम्। यथा- **'रङ्गपीठस्य दक्षिणतो निवेशितस्तम्भद्वयाच्चतुर्हस्तान्तरावन्योन्यमष्टहस्तान्तरौ द्वौ। तत आग्नेयस्तम्भसम्मुखो योऽन्यस्तु पूर्वस्तम्भः ततश्चतुर्हस्तान्तरं दक्षिणं स्तम्भं कुर्यादेवमुत्तरत्रापि'**[18] पुनश्चावशिष्टानामष्टानां स्तम्भानां स्थापनक्रमं व्यनक्ति श्रीशङ्कुकः- **'दक्षिणभित्तेरुदग्भागे चतुर्हस्तान्तरं पूर्वस्थापितस्तम्भाद् भित्तेश्चौकं स्तम्भं दद्यात् पूर्वम्। एवम् उत्तरभित्तेः दक्षिणदिग्भागे। ततः पूर्वभित्तेश्चतुर्हस्तान्तरौ रङ्गभागद्वयानुसारेण। ततोऽपि चतुर्हस्तान्तरौ द्वौ'**[19] एवमाहत्य नाट्यगृहेऽत्र प्रयुज्यमानाः स्तम्भाश्चुर्विंशतिः। तत्र प्रतीयते यत् प्रेक्षकासनोपयुक्तानां चतुर्दशानां स्तम्भानामुन्नतत्वं सोपानमिव रङ्गपीठाच्चतुर्हस्तमितादूरतो भित्तिं प्रति वर्धते क्रमश इति। मण्डपेऽत्रापि विकृष्टमण्डप इव पञ्चद्वाराणि भवन्तीति बहूनामभिप्रायः। परमत्राभिनवगुप्तानुसारं नेपथ्याद्रङ्गपीठं प्रवेष्टुं प्रेक्षकद्वारसम्मुखं षष्ठमपि द्वारं, येन सूत्रधारो नटी च प्रविशतः स्म।

अथ च तृतीयं खलु भरतकथितं नाट्यगृहं त्र्यस्राख्यं यद्धि विकृष्टमिव ज्येष्ठमध्यमकनिष्ठभेदेन त्रिधा। परमत्रापि भरतो दैर्ध्यादिकमनुक्त्वैवत्र्यस्राख्यं नाट्यगृहं वर्णितवानस्ति। तद् यथा-

त्र्यस्रं त्रिकोणं कर्तव्यं नाट्यवेश्मप्रयोक्तृभिः।
मध्ये त्रिकोणमेवास्य रङ्गपीठं तु कारयेत्।।[21]

श्लोकस्यास्य भावं स्पष्टयताऽभिनवगुप्तेन लिखितं यत् - 'विकृष्टचतुरस्रमानद्वयमेव भवति। मध्ये च त्रिकोणमेव रङ्गपीठम्। तथैव रङ्गशिरः। नेपथ्यगृहञ्च'। अर्थात् त्र्यस्रमिदं नाट्यगृहं त्रिभुजाकारकं भवति। तत्र मध्ये रङ्गशीर्ष रङ्गपीठं नेपथ्यगृहं च त्रिकोणात्मकानि तथा प्रेक्षागृहं चतुर्भुजाकारकं भवतीति भावः। एवमत्र त्र्यस्रनाट्यगृहवर्णनक्रमे पुनरावृत्तिर्न स्यादिति धिया वक्ति मुनिर्भरतः-

विधिर्यश्चतुरस्रस्य भित्तिस्तम्भसमाश्रयः।
स तु सर्वः प्रयोक्तव्यस्त्र्यस्रस्यापि प्रयोक्तृभिः।।[22]

---

17. भरतनाट्यशास्त्रम्, अध्याय, 22, (गो.बा.के) पृष्ठ 43
18. भरतनाट्यशास्त्रम्, अध्याय, 22, (गो.बा.के) पृष्ठ 43
19. भरतनाट्यशास्त्रम्, अध्याय, 22, (गो.बा.के) पृष्ठ 44
20. भरतनाट्यशास्त्रम्, अध्याय, 22, (गो.बा.के) पृष्ठ 45
21. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 108
22. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 110

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तात्पर्यमिदं यच्चतुरस्रेऽपि सर्वोऽपि विधिरनुष्ठेयः। अर्थाच्चतुरस्रनाट्यमण्डपस्य कृते यद् भित्तिविषये स्तम्भविषये वा विधानं विहितं तदेवात्रापि त्र्यस्रनाट्यमण्डपेऽवगन्तव्यमिति भावः। वस्तुतो भारतेऽस्मिन्नाट्यशास्त्रे प्रेक्षागृहविषयकं विशदं खलु राजते विवेचनम्। तत्र निर्माणक्रमे भित्तिस्थापनं स्तम्भस्थापनमित्यादिकं सर्वमपि शास्त्रोक्तपूजनादिविधानेनैव कार्यमित्याह। यथा–

श्रूयतां तद् यथा यत्र कर्तव्यो नाट्यमण्डपः।
तस्य वास्तु च पूजा च यथा योज्या प्रयत्नतः।।[23]

पुनश्च–

सर्वलक्षणसम्पन्ने कृते नाट्यगृहे शुभे।
गावो वसेयुः सप्ताहं सह जप्यपरैर्द्विजैः।।

ततोऽधिवासयेद् वेश्म रङ्गपीठं तथैव च।
मन्त्रपूतेन तोयेन प्रोक्षिताङ्गो निशागमे।।[24]

अत्र हि नाट्यगृहादिषु विविधानि मनोहराणि चित्राणि लेख्यानि, विविधाश्चानुलेपाः प्रयोक्तव्या इत्यादिकं बहुविलक्षणतया विवेचितं, परमत्र निबन्धे विस्तरभिया नोल्लिखितम्।

---

23. भरतनाट्यशास्त्रम्, अध्याय, 22, श्लोक 06
24. भरतनाट्यशास्त्रम्, अध्याय, 3, श्लोक 1–2

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

गृह्यसूत्रेषु वास्तुशान्तिविधानम्

डॉ.मुष्टि वेङ्कटनागपवनकुमारशर्मा

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकोपायं यो बोधयति स वेद इति वेदस्य लक्षणम्। वेदबोधित-श्रेयस्साधनताको हि धर्म इति धर्मलक्षणम्। वेदोऽखिलो धर्ममूलमिति स्मृत्या अलौकिकोपायबोधकोऽयं वेदराशिः धर्ममूलक इति ज्ञायते। धर्मश्च वेदप्रमाणकं श्रेयस्साधनं कर्म इत्युच्यते। तत्कर्म द्विविधं प्रवृत्तिनिवृत्तिभेदात्। तदाह मनुः –

प्रवृत्तं च निवृत्तं च द्विविधं कर्मचोदितम्।
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते॥[1]

एवमेवायं धर्मः प्रवृत्तिनिवृत्तिभेदाद्द्विधा वर्तते। आचारव्यवहारादिः प्रवृत्तिधर्मः, यतिधर्म-मोक्षोपाय-आत्मविचारादिः निवृत्तिधर्मः। प्रवृत्तिधर्मोऽपि श्रौतस्मार्तभेदेन द्विधा वर्तते। ज्योतिष्टोमादिर्यागः श्रौतः। स्मार्तस्तु षड्विधः – वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मो साधारणधर्मश्चेति। षोढा विद्यमानस्य स्मार्तधर्मस्य परिरक्षणं गृह्यसूत्रोक्त-कर्मणामनुष्ठाननैव भवतीत्यत्र नास्ति संदेहः। दृश्यन्ते बहूनि गृह्यसूत्राणि वेदशाखासम्बद्धानि विज्ञायन्ते च बहवो गृह्यधर्माः। गृह्यमित्ययं शब्दः गृहसम्बन्धेन क्वचित्प्रयुज्यते। तत्र सगृहो गृहमागतः इत्यत्र प्रथमगृहशब्दः भार्यापरः, द्वितीयः शालापरः। गृहे वर्तमानाग्नौ क्रियमाणसंस्कारबोधकत्वात् गृह्यमिति अस्य सूत्रस्य नाम। ये गर्भाधानादिसंस्काराः गृह्यसूत्रेषूक्ताः वर्तन्ते ते सर्वेऽपि गृह एवानुष्ठेयानि। अत एव सर्वेष्वपि गृह्यसूत्रेषु वारं वारं अगारशब्दः प्रयुक्तः।

उक्तं च मानवगृह्यसूत्रव्याख्याने – **उक्तानि नित्यानि साधनानि शालाग्निसहितानि इदानीं महायज्ञा वक्तव्यास्ते च गृहे भवन्ति तेन गृहकरणं तावदाह-अवसानं समं समूलम् – अवस्यन्ति समाप्नुवन्ति श्रौतस्मार्तकर्माणि यस्मिंस्तदवसानम्**[2] इति। एवमेव तत्तत्सूत्रप्रणेतृभिः महर्षिभिरपि गृहनिर्माण- प्रवेश-वास्तुपूजादीनि विधानानि विशेषतया उपदिष्टानि वर्तन्ते।

भूलक्षणं द्वारकल्पनं च

तत्र खादिरगृह्यसूत्रे गृहनिर्माणार्थं वर्णविशेषेण भूविशेषः उक्तः। यथा –गौरे भूमिभागे ब्राह्मणः, लोहिते क्षत्रियः, कृष्णे वैश्योऽवसानं जोषयेदिति[3]। समराङ्गणसूत्रधारे च किञ्चिद्भेदेन एवमेव

1. म.स्मृ. अ.12, श्लो. 88-89
2. मा.गृ. सू. अ.व्या. पृ.167
3. खा.गृ.सू. प.4, खं.2, सू. 6

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भूलक्षणमुक्तं वर्तते। तथाहि-

सिता रक्ता च पीता च कृष्णा चैव क्रमान्मही।
विप्रादीनां हि वर्णानां सर्वेषामथवा हिता।।[4]

तथा गोभिलगृह्यसूत्रे स्थललक्षणं वास्तुशास्त्राभिन्नमुक्तम्। यथा- यत्र समा भूमिः वर्तते, कृतस्य वेश्मनः नदीतीरतटाकभेदवृक्षपातमार्गादिभ्यो विनाशः यत्र न स्यात्, प्राङ्मुखा उदङ्मुखा वा आपः यत्र गच्छन्ति, यत्र अकटुका ओषधयस्स्युः तादृशीभूमिः गृह्णीयादिति। एवं दर्भसंमितो देशः ब्रह्मवर्चसकामस्य, बृहत्तृणयुतः देशः बलकामस्य, मृदुतृणदेशः पशुकामस्य शुभो भवतीत्युक्तम्। तत्र द्वारकल्पने च फलमभिहितं वर्तते। यशस्कामो बलकामश्च प्राग्द्वारं, पुत्रपशुकामः उदग्द्वारं, सर्वकामः दक्षिणद्वारं कुर्यादिति। **न प्रत्यग्द्वारं कुर्वीतेति**[5] निषेधश्च तत्रैव कृतः। गृहस्य चतुर्दिक्षु वृक्षनियमः विशेषेण नियमितः। यथा अश्वत्थं पूर्वस्यां दिशि, प्लक्षं दक्षिणस्यां, न्यग्रोधं प्रतीच्यां, औदुम्बरमुदीच्यां च वर्जयेदिति। तत्रेदं प्रमाणम्-

वर्जयेत्पूर्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा।
न्यग्रोधमपराद्देशात् उत्तराच्चाप्युदुम्बरम्।।[6]

उक्तं च वराहमिहिरकृतायां बृहत्संहितायां वास्तुविद्याध्याये-

याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते।
उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः।।[7]

अतः उत्तरादिदिक्षु प्लक्षादिवृक्षयुक्तं गृहं कल्पयेदिति विज्ञायते।

भूपरीक्षा

यथा वास्तुशास्त्रे गृहनिर्माणार्थं प्रशस्ता भूमिः विहिता तथैव गृह्यसूत्रेष्वपि प्रोक्ता। तत्र आश्वलायनगृह्यसूत्रे भूपरीक्षा एवं दृश्यते। यस्मिन्देशे गृहनिर्माणं कर्तु यजमानश्चिकीर्षति तं देशं गत्वा जानुमात्रमवटं खात्वा अवटादुद्धृतैरेव पांसुभिः पुनस्तं पूरयेत्। पांसुराशिः गर्ताधिकश्चेत् गृहनिर्माणं शुभमिति, समे मध्यममिति, न्यूने गर्हितं भवति[8]। तथा चान्या परीक्षा उपदिष्टा-गृहनिर्माणप्रदेशे गर्तं खात्वा सूर्यास्तमयानन्तरं तं गर्तमद्भिः पूरयेत्। परस्मिन्दिने सूर्योदयानन्तरं गर्तं परीक्षेत्। गर्ते किञ्चिदुदकमस्तिचेत्तत्र गृहनिर्माणं शुभं भवति। आर्द्रं चेन्मध्यमं भवति। शुष्कं चेद्गर्हितं भवतीति

4. स.सू. अ.8, श्लो.48
5. गो.गृ.सू. प्र.4, खं.7, सू.17
6. गो.गृ.सू. प्र.4, खं.7, सू.20
7. बृ.सं. अ.52, श्लो. 83
8. आ.गृ.सू. अ.2, खं.8, सू.2-3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सूत्रकारस्याभिप्रायः[9]।

गृहनिर्माणविधिः

मन्त्रयुक्तः गृहनिर्माणविधिः गृह्यसूत्रेषु प्रपञ्चितः। तत्र आपस्तम्बगृह्यसूत्रे विधिरयमभिप्रेतः। यथा-यत्र गृहनिर्माणं क्रियते तं देशं समं कृत्वा **स्योना पृथिवी**[10] इत्यनेन मन्त्रेणाभिमन्त्र्य, गृहस्थूणानां गर्तान् प्रागादिषु प्रदक्षिणं कर्मकारैः खातयित्वा, प्राग्द्वारे गृहे सति दक्षिणां द्वारस्थूणां **इहैव तिष्ठ निमिताः, आत्वा कुमारस्तरुण**[11] इत्येताभ्यां द्वाभ्यां मन्त्राभ्यां द्वारदक्षिणगर्ते प्रतिष्ठाप्य, ताभ्यामेव मन्त्राभ्यां द्वारस्योत्तरगर्ते उत्तरां द्वारस्थूणां निधाय, ततः इतराः गृहस्थूणाः खननक्रमेण तूष्णीं गर्तेषु प्रतिष्ठापयेत्। एवं सर्वास्ववहितासु सत्सु स्थूणास्वाधीयमानम् अगारस्तूपं **ऋतेन स्थूणावधिरोह**[12] इति यजुषा अभिमन्त्रयते। एवं निर्मितमगारं मन्त्रलिङ्गमनुसृत्याभिमन्त्रयेत्। तथाहि-

ब्रह्म च ते क्षत्रं च पूर्वे स्थूणे अभिरक्षतु	-	प्राचीं स्थूणां प्राङ्मुखो भूत्वा
यज्ञश्च दक्षिणाश्च दक्षिणे	-	दक्षिणां स्थूणां दक्षिणाभिमुखो भूत्वा
इषश्चोर्जश्चापरे	-	पश्चिमां स्थूणां पश्चिमाभिमुखो भूत्वा
मित्रश्च वरुणश्चोत्तरे	-	उत्तरां स्थूणां उत्तराभिमुखो भूत्वा
धर्मस्ते स्थूणा राज श्रीस्ते स्तूपः	-	मध्यमां स्थूणां मध्यमाभिमुखो भूत्वा अभिमन्त्रयेत्।

एवं वास्तुशास्त्रमनतिक्रम्य गृहनिर्माणं कृत्वा ततः गृहप्रवेशं कुर्यात्।

गृहप्रवेशविधिः

नवागारप्रवेशविधिरप्यापस्तम्बेन स्पष्टमुपदिष्टः। तथाहि- पूर्वोक्तविधिना गृहनिर्माणं कृत्वा वास्तुशास्त्रोक्तदिशा ज्योतिश्शास्त्रोक्तमार्गेण च नवागारप्रवेशार्थं सुमुहूर्तं निश्चित्य प्रवेशः कर्तव्यः।

तथा च -

अकपाटमनाच्छन्नमदत्तबलिभोजनम् ।
गृहान्न प्रविशेदायुर्विपदामाकरं हि तत्॥[14]

इत्युक्तत्वात् आदौ तत्तद्देवेभ्यः पूजा ब्राह्मणैः कारयितव्या। पूजाक्रमश्च ज्योतिस्तत्त्वे उक्तः। तथाहि-

---

9. आ.गृ.सू. अ.2, खं.8, सू.4-3
10. कृ.य.तै.ए. प्र.2, अनु.15, मं.2
11. कृ.य.तै.ए. प्र.2, अनु.15, मं.3,4
12. कृ.य.तै.ए. प्र.2, अनु.15, मं.5
13. कृ.य.तै.ए. प्र.2, अनु.15, मं.6-11
14. आपस्तम्बीयपञ्चदशकर्मानुक्रमणिका- पृ. 378

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

गणेशं गन्धपुष्पाद्यैर्लोकपालानथ ग्रहान्।
पूजयेत् क्षेत्रपालांश्च क्रूरभूतांश्च बाह्यतः॥
ब्रह्माणं वास्तुपुरुषं तद्गेहस्थाश्च देवताः॥[15]

एवमेव एतेषां पूजाकालश्च उपदिष्टः। नवागारप्रवेशात्पूर्वं या वास्तुशान्तिः अनुष्ठीयते सा दिवैव कर्तव्या। रात्रौ गृहप्रवेशे क्रियमाणे सत्यपि प्रातः वास्तुशान्तिं कृत्वा रात्रौ प्रवेशः करणीयः। यदि उषःकाले प्रवेशः क्रियते तदा पूर्वस्मिन्दिने प्रातः वास्तुशान्तिं कुर्यात्। तथाहि–

वास्तुशान्तिर्दिवैवोक्ता प्रवेशस्तु निशि क्वचित्।
गृहप्रवेशप्रारम्भदिनमासादिकैः शुभः॥[16]

एवं गृहप्रवेशनात्पूर्वमेव शून्यगृहाधिष्ठानां देवानां पूजा कर्तव्या। तदकरणे प्रत्यवायश्च उक्तं च महाकपिलपञ्चरात्रे –

सर्वेषां किल वास्तूनां नायकाः परिकीर्तिताः।
असम्पूज्य हि तान् सर्वान्प्रासादादीह कारयेत्॥
अनिष्पत्तिर्विनाशस्स्यादुभयोर्धर्मधर्मिणोः ॥[17]

एवं गृहाधिष्ठातृदेवताभ्यः ब्राह्मणमुखेन पूजां कारयित्वा यजमानः स्वकीयमौपासनाग्निं पालाशमयेन इध्मेन प्रज्वाल्य ज्वलन्तमग्निम् **उद्ध्रियमाण उद्धर**[18] इत्यनेन यजुषा उद्धृत्य अह्नि गृहप्रवेशे सति **रात्रौ यदेनः कृतमस्ति पापम्** इति, रात्रौ गृहप्रवेशे **अह्ना यदेनः कृतमस्ति पापम्** इति पठित्वा, **इन्द्रस्य गृहा वसुमन्तो**[19] इत्यनेन यजुषा गृहप्रवेशं कुर्यात्। ततः **अमृताहुतिममृतायाम्**[20] इत्यनेन मन्त्रेण तमौपासनाग्निं अगारस्योत्तरपूर्वदेशे संस्थाप्य, तस्य दक्षिणतः दर्भेषु **अन्नपते**[21] इत्यनेन मन्त्रेण व्रीहीन् संस्थाप्य, तस्मिन्नुदकुम्भं तूष्णीं प्रतिष्ठाप्य, अरिष्टा अस्माकम्[22] इत्यनेन मन्त्रेण चतुर्भिः कलशैः उदकुम्भे जलं संस्थाप्य, उदकुम्भे ऊर्ध्वाग्रं कूर्चं विनिक्षिपेत्। ततः **वास्तोष्पते प्रतिजानीहि, वास्तोष्पते शग्मया, वास्तोष्पते**[23] **प्रतरणो नः, अमीवहा वास्तोष्पते** इत्येतैर्मन्त्रैः वास्तुपुरुषमावाह्य षोडशोपचारैरभ्यर्च्य तैरेव मन्त्रैः सकृद्धोमं कृत्वा, होमशेषं परिसमाप्य, **शिवँ**

15. गो.गृ.सू. भ.ना. व्या. पृ.838
16. आपस्तम्बीयपञ्चदशकर्मानुक्रमणिका– पृ. 378
17. गो.गृ.सू. भ.ना.व्या. पृ.838
18. कृ.य.तै.ए. प्र.2, अनु.15, मं.12
19. कृ.य.तै.ए. प्र.2, अनु.15, मं.13
20. कृ.य.तै.ए. प्र.2, अनु.15, मं.14
21. कृ.य.तै.ए. प्र.2, अनु.15, मं.15
22. कृ.य.तै.ए. प्र.2, अनु.15, मं.16
23. कृ.य.तै.ए. प्र.2, अनु.15, मं.18–21

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शिवम्[24] इत्यनेन यजुषा सकृदुपात्तेन उदकुम्भेन अगारमन्ततः त्रिः प्रदक्षिणं निरन्तरधारया परिसेचनं कुर्यात्। गृहान्तराले एवं क्रियते चेत् भूतप्रेतादिभ्यः शान्तिः भवतीति ज्ञायते। अत्र वास्तुशास्त्रोक्तमार्गेण एकाशीतिपदवास्तुमण्डले तत्तद्देवानावाह्य पूजादिकं क्रियते। एवं शास्त्रोक्तविधिना वास्तुपूजाकरणेन **आधयो व्याधयो ग्रहा उपसर्गाश्चपहन्युः**[25] इति बोधायनवचनात् सर्वारिष्टनिवारणद्वारा मङ्गलावाप्तिर्भवति।

वास्तुशान्तिविधानम्

गृह्यसूत्रेषु समस्तामयदोषनिवारणार्थं वास्तुशमनविधानं प्रोक्तं वर्तते। वास्तुशान्तिरैषा च प्रतिमासं, ऋतौ, संवत्सरे वा आपूर्यमाणपक्षे पुण्यनक्षत्रे कार्या। तथा च – अपामार्गशिरीष-पलाशोदुम्बरेष्वन्यतमेन गृहं बद्ध्वा मानोमहान्तम्, मानस्तोके इति द्वाभ्यां मन्त्राभ्यां अगारं सम्मार्जयेत्। ततः दर्भमुष्टिमुपसंगृह्य पञ्चगव्यद्रव्येण यत इन्द्र भयामहे, स्वस्तिदा इति द्वाभ्यां मन्त्राभ्यां संप्रोक्षयेत्। ततः नवधान्यानि कृणुष्व पाजः प्रसितिमित्येतेनानुवाकेन गृहे संप्रकीर्य, वास्तोष्पते प्रतिजानीहि, वास्तोष्पते शग्मया इत्याभ्यां द्वाभ्यां मन्त्राभ्यां प्रधानहोमं कृत्वा, वास्तोष्पते ध्रुवा स्थूणां इत्यनुवाकेन उपहोमं कृत्वा गायत्रीमन्त्रेण सहस्रवारं होमं कुर्यात्। ततो होमशेषं परिसमाप्य पुण्याहवाचनं कृत्वा ब्राह्मणानन्नेन परितोषयेत्। एवं वास्तुशान्तिः क्रियते चेद्गृहशान्तिः वंशाभिवृद्धिश्च भवतीति, सर्पराक्षसतस्करादिभयं न भविष्यतीति, ग्रहपीडा, व्याधपीडा च न संभवतीति बोधायनेनोपदिश्यते। तथाहि-

एवं प्रयुञ्जानो महान्तं पोषं पुष्यति बहवः
पुत्रं भवन्ति न च बालाः प्रमीयन्ते न।
ग्रहव्याधयो गृह्णन्ति न दंष्ट्रिणो घातयेयुर्न
तस्करसर्पराक्षसपिशाचा बाधन्ते।।[26]

अतः सकलशुभमङ्गलावाप्तये गृहाभिवृद्ध्ये च यथावकाशं वास्तुशान्तिः कर्तव्या इत्यवगम्यते। एवं गृह्यसूत्रेषु गृहनिर्माणविधिः, गृहप्रवेशविधिः वास्तुपूजाविधिश्च यथा वास्तुशास्त्रे उपदिष्टः तथैवोक्तः वर्तते। वास्तुशास्त्रोक्तविधिना गृहनिर्माणादिकरणार्थं स्वस्वगृह्यसूत्रज्ञानमपेक्षितं वर्तते। यतोहि गृह्यसूत्रेषु तद्विधानानि सम्यक्तया प्रतिपादितानि वर्तन्ते। गृह्यसूत्राज्ञाने कर्तुं न शक्यते प्रयोगः। प्रयोगाभावाच्छास्त्रमपि निरुपयोगं भवति। तथैव केवलगृह्यसूत्रपठनेन प्रयोगज्ञानेन च नास्ति महानुपयोगः। वास्तुज्ञानाभावात् प्रयोगज्ञानस्यापि निरुपयोगत्वात्। अतः द्वयोः ज्ञानमत्यन्तमावश्यकं भवति। एवं वास्तुशास्त्रं, गृह्यसूत्रोक्तविधिं च सुपरिशील्य गृहनिर्माणादिकरणेन सर्वेषाम् इष्टप्राप्तिरनिष्टपरिहारश्च जायते। तेन विश्वशान्तिः भवति।

24. कृ.य.तै.ए. प्र.2, अनु.15, मं.22
25. बो.गृ.सू. प्र.3, अ.5, सू.8
26. बो.गृ.शे.सू. प्र.1, अ.19, सू.8

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

गणेशं गन्धपुष्पाद्यैर्लोकपालानथ ग्रहान्।
पूजयेत् क्षेत्रपालांश्च क्रूरभूतांश्च बाह्यतः॥
ब्रह्माणं वास्तुपुरुषं तद्गेहस्थाश्च देवताः॥[15]

एवमेव एतेषां पूजाकालश्च उपदिष्टः। नवागारप्रवेशात्पूर्व या वास्तुशान्तिः अनुष्ठीयते सा दिवैव कर्तव्या। रात्रौ गृहप्रवेशे क्रियमाणे सत्यपि प्रातः वास्तुशान्तिं कृत्वा रात्रौ प्रवेशः करणीयः। यदि उषःकाले प्रवेशः क्रियते तदा पूर्वस्मिन्दिने प्रातः वास्तुशान्तिं कुर्यात्। तथाहि–

वास्तुशान्तिर्दिवैवोक्ता प्रवेशस्तु निशि क्वचित्।
गृहप्रवेशप्रारम्भदिनमासादिकैः शुभः॥[16]

एवं गृहप्रवेशनात्पूर्वमेव शून्यगृहाधिष्ठानां देवानां पूजा कर्तव्या। तदकरणे प्रत्यवायश्च उक्तं च महाकपिलपञ्चरात्रे –

सर्वेषां किल वास्तूनां नायकाः परिकीर्तिताः।
असम्पूज्य हि तान् सर्वान्प्रासादादीह कारयेत्॥
अनिष्पत्तिर्विनाशस्स्यादुभयोर्धर्मधर्मिणोः ॥[17]

एवं गृहाधिष्ठातृदेवताभ्यः ब्राह्मणमुखेन पूजां कारयित्वा यजमानः स्वकीयमौपासनाग्निं पालाशमयेन इध्मेन प्रज्वाल्य ज्वलन्तमग्निम् **उद्ध्रियमाण उद्धर**[18] इत्यनेन यजुषा उद्धृत्य अह्नि गृहप्रवेशे सति **रात्रौ यदेनः कृतमस्ति पापम्** इति, रात्रौ गृहप्रवेशे **अह्ना यदेनः कृतमस्ति पापम्** इति पठित्वा, **इन्द्रस्य गृहा वसुमन्तो**[19] इत्यनेन यजुषा गृहप्रवेशं कुर्यात्। ततः **अमृताहुतिममृतायाम्**[20] इत्यनेन मन्त्रेण तमौपासनाग्निं अगारस्योत्तरपूर्वदेशे संस्थाप्य, तस्य दक्षिणतः दर्भेषु **अन्नपते**[21] इत्यनेन मन्त्रेण व्रीहीन् संस्थाप्य, तस्मिन्नुदकुम्भं तूष्णीं प्रतिष्ठाप्य, अरिष्टा अस्माकम्[22] इत्यनेन मन्त्रेण चतुर्भिः कलशैः उदकुम्भे जलं संस्थाप्य, उदकुम्भे ऊर्ध्वाग्रं कूर्चं विनिक्षिपेत्। ततः **वास्तोष्पते प्रतिजानीहि, वास्तोष्पते शग्मया, वास्तोष्पते**[23] **प्रतरणो नः, अमीवहा वास्तोष्पते** इत्येतैर्मन्त्रैः वास्तुपुरुषमावाह्य षोडशोपचारैरभ्यर्च्य तैरेव मन्त्रैः सकृद्धोमं कृत्वा, होमशेषं परिसमाप्य, **शिवँ**

15. गो.गृ.सू. भ.ना. व्या. पृ.838
16. आपस्तम्बीयपञ्चदशकर्मानुक्रमणिका– पृ. 378
17. गो.गृ.सू. भ.ना.व्या. पृ.838
18. कृ.य.तै.ए. प्र.2, अनु.15, मं.12
19. कृ.य.तै.ए. प्र.2, अनु.15, मं.13
20. कृ.य.तै.ए. प्र.2, अनु.15, मं.14
21. कृ.य.तै.ए. प्र.2, अनु.15, मं.15
22. कृ.य.तै.ए. प्र.2, अनु.15, मं.16
23. कृ.य.तै.ए. प्र.2, अनु.15, मं.18–21

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शिवम्[24] इत्यनेन यजुषा सकृदुपात्तेन उदकुम्भेन अगारमन्ततः त्रिः प्रदक्षिणं निरन्तरधारया परिसेचनं कुर्यात्। गृहान्तराले एवं क्रियते चेत् भूतप्रेतादिभ्यः शान्तिः भवतीति ज्ञायते। अत्र वास्तुशास्त्रोक्तमार्गेण एकाशीतिपदवास्तुमण्डले तत्तद्देवानावाह्य पूजादिकं क्रियते। एवं शास्त्रोक्तविधिना वास्तुपूजाकरणेन **आधयो व्याधयो ग्रहा उपसर्गाश्चपहन्युः**[25] इति बोधायनवचनात् सर्वारिष्टनिवारणद्वारा मङ्गलावाप्तिर्भवति।

वास्तुशान्तिविधानम्

गृह्यसूत्रेषु समस्तामयदोषनिवारणार्थं वास्तुशमनविधानं प्रोक्तं वर्तते। वास्तुशान्तिरैषा च प्रतिमासं, ऋतौ, संवत्सरे वा आपूर्यमाणपक्षे पुण्यनक्षत्रे कार्या। तथा च – अपामार्गशिरीष-पलाशोदुम्बरेष्वन्यतमेन गृहं बद्ध्वा मानोमहान्तम्, मानस्तोके इति द्वाभ्यां मन्त्राभ्यां अगारं सम्मार्जयेत्। ततः दर्भमुष्टिमुपसंगृह्य पञ्चगव्यद्रव्येण यत इन्द्र भयामहे, स्वस्तिदा इति द्वाभ्यां मन्त्राभ्यां संप्रोक्षयेत्। ततः नवधान्यानि कृणुष्व पाजः प्रसितिमित्येतेनानुवाकेन गृहे संप्रकीर्य, वास्तोष्पते प्रतिजानीहि, वास्तोष्पते शग्मया इत्याभ्यां द्वाभ्यां मन्त्राभ्यां प्रधानहोमं कृत्वा, वास्तोष्पते ध्रुवा स्थूणां इत्यनुवाकेन उपहोमं कृत्वा गायत्रीमन्त्रेण सहस्रवारं होमं कुर्यात्। ततो होमशेषं परिसमाप्य पुण्याहवाचनं कृत्वा ब्राह्मणानन्नेन परितोषयेत्। एवं वास्तुशान्तिः क्रियते चेद्गृहशान्तिः वंशाभिवृद्धिश्च भवतीति, सर्पराक्षसतस्करादिभयं न भविष्यतीति, ग्रहपीडा, व्याधपीडा च न संभवतीति बोधायनेनोपदिश्यते। तथाहि–

एवं प्रयुञ्जानो महान्तं पोषं पुष्यति बहवः
पुत्रं भवन्ति न च बालाः प्रमीयन्ते न।
ग्रहव्याधयो गृह्णन्ति न दंष्ट्रिणो घातयेयुर्न
तस्करसर्पराक्षसपिशाचा बाधन्ते।।[26]

अतः सकलशुभमङ्गलावाप्तये गृहाभिवृद्ध्ये च यथावकाशं वास्तुशान्तिः कर्तव्या इत्यवगम्यते। एवं गृह्यसूत्रेषु गृहनिर्माणविधिः, गृहप्रवेशविधिः वास्तुपूजाविधिश्च यथा वास्तुशास्त्रे उपदिष्टः तथैवोक्तः वर्तते। वास्तुशास्त्रोक्तविधिना गृहनिर्माणादिकरणार्थं स्वस्वगृह्यसूत्रज्ञानमपेक्षितं वर्तते। यतोहि गृह्यसूत्रेषु तद्विधानानि सम्यक्तया प्रतिपादितानि वर्तन्ते। गृह्यसूत्राज्ञाने कर्तुं न शक्यते प्रयोगः। प्रयोगाभावाच्छास्त्रमपि निरुपयोगं भवति। तथैव केवलगृह्यसूत्रपठनेन प्रयोगज्ञानेन च नास्ति महानुपयोगः। वास्तुज्ञानाभावात् प्रयोगज्ञानस्यापि निरुपयोगत्वात्। अतः द्वयोः ज्ञानमत्यन्तमावश्यकं भवति। एवं वास्तुशास्त्रं, गृह्यसूत्रोक्तविधिं च सुपरिशील्य गृहनिर्माणादिकरणेन सर्वेषाम् इष्टप्राप्तिरनिष्टपरिहारश्च जायते। तेन विश्वशान्तिः भवति।

24. कृ.य.तै.ए. प्र.2, अनु.15, मं.22
25. बो.गृ.सू. प्र.3, अ.5, सू.8
26. बो.गृ.शे.सू. प्र.1, अ.19, सू.8

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

देवप्रासादविज्ञानम्

डॉ. देशबन्धुः

भारतीयस्थापत्यमस्ति भारतीयसंस्कृतेरन्यतममङ्गम्। भारतीयस्थापत्यस्य पार्थिवापार्थिवयोः सङ्गम एव वैशिष्ट्यम्। यूनानरोमादिदेशानां वास्तुकलासु पार्थिवतत्त्वानामेव विकासो दृश्यते। मानवशरीरमभिव्यक्तुमेव प्रवर्तते प्रामुख्येन यूनानरोमदेशीया वास्तुकला। तेषां स्थापत्ये शरीरावयवानामभिव्यक्तिरेव निष्णातस्थपतीनां कलायाः पराकाष्ठा, विशालभवनानि तेषां गौरवस्य परिचायकतत्वानि परञ्च अस्माकं स्थापत्ये प्रत्येकस्य देवमन्दिरस्य एका पृष्ठभूमिः वर्तते। प्राच्यभारतीयनगराणामितिहासावलकोननेन ज्ञायते यत् नगरमन्दिरस्थानानां विकासः समानरूपेणाभवत्। संसारस्य सर्वेषु देशेषु नगराणामेषा एव कथा परञ्च भारतस्य विषये तु प्रसिद्धमेतत् यत्–

"Temple was a city in Making."[1]

"मन्दिरस्य स्थापना जाता चेत् नगरमपि तत्रैव भविष्यति" इति पूर्णतः युक्तियुक्तमस्ति। **"मंद्यतेऽत्र मंदतेः किरंच"**[2] अनुसारं गृहं वासस्थानं वा मन्दिरमिति कथ्यते। मन्दिरशब्दस्य व्युत्पत्तिः मंद् धातोः जातः। अस्यार्थः प्रसन्नता कान्तिमान् सुवर्णो वा। भारतीयसाहित्ये मन्दिरं, देवालयः, देवस्थानं, देवायतनं, देवनिकेतनं प्रासादादिभिर्नामभिः स्मर्यते। भारतस्योत्तरभूभागे मन्दिरस्य कृते प्रासादः दक्षिणभूभागे विमानं-हर्म्यो वा शब्दः प्रयुज्यते। वेदेष्वपि ''हर्म्य'' शब्दस्य प्रयोगो दृश्यते परञ्च शिल्पशास्त्रीयग्रन्थेषु हर्म्यप्रासादयोर्भेदः कृतः।[3] समराङ्गणसूत्रधारे कस्यापि भवनस्योर्ध्वभाग एव "हर्म्य" इति कथ्यते।[4] आङ्गलभाषायां देवालयस्य कृते "टेम्पल" शब्दः प्रयुज्यते। शब्दोऽयं लैटिनभाषायाः "टेम्पलम्" शब्दात् व्युत्पद्यते। अस्यार्थः आयताकारो देवालयः। रस्किन् महोदयानुसारं ''यत्र देव-पूजनादि-कार्याणि भवन्ति तत् भवनमेव "टेम्पल"[5] इति। विश्वकर्मप्रकाशे मन्दिरं प्रस्तरनिर्मितनिवासस्थानमिति प्राप्यते।[6] कालान्तरे देवालयः कस्यापि देवस्य निवासमात्रमित्यर्थादतिरिक्तं स्वयमेव देवस्य स्वरूपो जातः। यथोक्तम्–

---

1. भारतीयवास्तुशास्त्रम्-पृ. 95 (उद्धृतम्), द्विजेन्द्रनाथशुक्ल, भारतीयवास्तुशास्त्र, शुक्ला प्रिंटिग प्रेस, लखनऊ-1956ई.
2. संस्कृतहिन्दीकोशः- पृ. 776, वामन शिवराम आप्टे, मोती लाल बनारसी दास, दिल्ली, 1969ई.
3. मयमतम्-24/82, सं. शैलजा पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी - 2007ई.
4. समराङ्गणसूत्रधारः-13/10, सं. - द्विजेन्द्रनाथशुक्ल, वास्तुवाङ्मयप्रकाशनमाला, लखनऊ, 1965ई.
5. प्रासादनमण्डनम् पृ. 21, सं. भगवानदासजैन, यति श्यामालालजी उपाध्याय, जयपुर - 1963ई.
6. विश्वकर्माप्रकाशः- 4/13, खेमराज श्रीकृष्णदासप्रकाशन, मुखई, 2002 ई.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

प्रासादं पुरुषं मत्वा पूजयेद् मन्त्रवित्तमः।
एवमेव हरिः साक्षात् प्रासादत्वेन संस्थितः॥[7]

अतएव साक्षात् हरिस्वरूपत्त्वात् प्रासादोऽपि पूज्यो भवति। अत एव प्रासादेन तात्पर्यं न केवलं भवनमात्रमेवापितु अमूर्तपुरुषस्य प्रत्यक्षमूर्तस्वरूपमेव। यत्र सर्वव्यापकोऽप्रत्यक्षपुरुषस्य प्रतीकस्वरूपत्वेन प्रतिमायाः स्थापना क्रियते। एतदेव कारणं यद् यत्र प्रतिमायाः दर्शनं पूजनञ्च भवति, तत्र देवालयस्य प्रदक्षिणाऽपि क्रियते। प्रासादप्रकल्पने पुरुषाकृतेः सन्निवेशो वास्तुशास्त्रस्य सर्वेषु ग्रन्थेषु प्राप्यते। यस्यां जगत्यां देवप्रासादस्य निर्माणमारभ्यते सः पादः, तस्योपरि 'जंघा' वर्तते। यस्मात् भागात् देवालयस्य अन्तः भागो दृश्यते सः "कटिः", अन्तः भागः 'उदरम्" देवालयस्य शिखरमेव तस्य शिरः, सम्मुखस्थभागः "शुकनासा" इति कथ्यते।[8] हिन्दुसंस्कृतौ देवपूजनस्य विधानं वर्तते, प्रत्येकस्मिन् पदार्थे देवत्वकल्पनमेव अस्माकं संस्कृतेरुदात्तभावः। देवपूजनस्य साकारपूजनं निराकारपूजनञ्च भेदद्वयं वर्तते। वैदिकसाहित्ये भक्त्युपासनयोः यन्मूलं निहितं तस्य पल्लवनं परवर्तीभारतीयसाहित्ये कलायाञ्च प्राप्यते। आगमपुराणानाञ्चोपासनापद्धत्यां विष्णुसूर्यशिवादिदेवानां पूजनस्य विस्तारो विन्यस्तः। भारतीयवास्तुशास्त्राचार्याः वास्तुशास्त्रं शास्त्रीयकलेवरं, स्थापत्यो भौतिकं रूपञ्च प्रावर्धन्। वास्तुशास्त्रे कलाविज्ञानयोः सम्मिश्रणं दृश्यते। अस्याः कलाया उद्भवो धर्मदर्शनाभ्याञ्च जातः। भारतीयशास्त्राणामेषा एव परम्परा यदत्र किमपि कार्यं देवत्वकल्पनां विना न क्रियते अत एव वास्तुशास्त्रेऽपि देवभावाः अनुप्राणिताः सन्ति।

भारतस्य विज्ञानमध्यात्मयुक्तमेव वर्तते। पाश्चात्यकलाया आधारः सौन्दर्यमेव परञ्च भारतीयकलाविज्ञानयोराधारे आध्यात्मदर्शने च स्तः। अत एव हिन्दूनां शब्द-नाद-रसब्रह्मवादादिवत् वास्तुब्रह्मवादोऽपि दर्शनशास्त्रात् स्वतन्त्रो न वर्तते। दार्शनिकदृष्टिं विना वास्तुब्रह्मवादस्य कल्पनाऽपि न सम्भवति। धार्मिकदार्शनिकचेतनाविहीनं विज्ञानं शुष्ककाष्ठवत् न किमप्युपकरोति।

भारतीयवास्तुशास्त्रस्योद्गमो वेदेभ्यो जातः। अथर्ववेदस्योपवेदे स्थापत्यवेदे वास्तुशास्त्रीयसिद्धान्तानां चिन्तनं विस्तरेण कृतम्। वेदादारभ्य वास्तुशास्त्रस्य परम्परा अद्यावधिः वर्धमाना दृश्यते। हिन्दुवास्तुकलायाः प्रतिनिधिभूतः देवालय एव। देवालयवास्तुकला धर्मदर्शनयोरनुप्राणितोऽस्ति। धर्मार्थकाममोक्षेषु पुरुषार्थचतुष्ट्येषु मोक्षप्राप्तिरेव सर्वोपरिः। तस्मात् भारतीयसंस्कृतौ सर्वाणि कार्याणि तस्योपलब्धये क्रियन्ते। तेषु कार्येषु विशिष्टतमं कार्यमिदं देवालय-निर्माणम्। देवालयोऽपि देव-प्रतिमा मन्यते।

विश्ववाङ्मयस्य प्राचीनतमे ग्रन्थे ऋग्वेदेऽप्यर्चावास्तोवर्णनं समुपलभ्यते।[9] मन्दिर-निर्माणसन्दर्भिताः विविधोल्लेखाः प्राचीनभारतीयसाहित्येषु प्राप्यन्ते। पुरातत्त्वीयावशेषेषु प्राचीनप्रतिमा-मुद्रादीनामवलोकनेन

---

7. अग्निपुराणम् - 61/27, सं. तारिणीशझा, हिन्दी-साहित्य सम्मेलन, प्रयाग, 1985ई.
8. प्राचीनभारतीयस्तूपगुहा एवं मन्दिर- पृ. 200, डॉ. वासुदेव उपाध्याय बिहार हिन्दी ग्रन्थ अकादमी, पटना - 2003ई.
9. ऋग्वेदसंहिता-1/32/2,7/54/1, सं. सांतवलेकर, स्वाध्यायमण्डल, भारतमुद्रणालय, मुम्बई - 1996 सन्वत्

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मन्दिराणां प्रामाणिकता सिद्ध्यते। अनेन ज्ञायते यत् आरम्भकाले मन्दिरं देवायतनं वा सहजमेव निर्मीयते स्म। प्रतिमां परितः वेदिकायाः निर्माणं क्रियते स्म। वेदिकाऽप्याच्छाद्यते स्म। मन्दिराणामाकृतये मानवशरीराणि, वृक्षाः, पर्वतशिखराणि च प्रेरणास्रोतांसि आसन्। सदेहसगुणात्मकदेवस्य प्रतिमानिर्माणाय मानवस्य प्रेरणास्रोतत्वेन प्रयोगः स्वभाविकमेव वर्तते। केचन वृक्षाः, पर्वतशिखराणि च देवालयस्य प्रतीकरूपेण गृहीतानि।

भारतीयस्थापत्यं यज्ञवेद्या आरभ्य मन्दिराणां शिखर-शिखां पर्यन्तं सुविस्तरं वर्तते। प्र उपसर्गपूर्वकं सद् धातोः घञ् प्रत्यये सति प्रासादः।[10] शब्दोऽयं निष्पद्यते। प्रसीदन्त्यस्मिन्निति प्रासादः।[11] एवमेव प्रकर्षेण सादनं चयनं वा प्रासादः।[12] चयनस्य इयं परम्परा एव हिन्दुप्रासादनिर्माणकलायाः पृष्ठभूमिरस्ति। भारतीयमन्दिराणां निर्माणे जनानां धार्मिकभावनायाः प्राधान्यमस्ति। मन्दिरस्य पीठं-कलेवरं-विस्तारञ्च अस्याः भावनायाः प्राकट्यं करोति। प्रासादवास्तोर्विकासक्रमेण ज्ञायते यत् या भावना पाषाणकाष्ठादिभिर्निमित-पूजागृहाणां निर्माणे आसीत्। सैव भावना आधुनिकप्रासादानां निर्माणे अनुस्यूता वर्तते।

प्रासादस्योतुङ्गशिखरो देवत्वान्वेषणाय मानवस्य प्रयासान् प्रदर्शयति। तत्रैव प्रासादशिखरारूढो मानवमनो देवदर्शनं करोति। देवालयरचना न केवलं लौकिककलाधारिता एव अपितु अलौकिका-ध्यात्मिकतत्वयोः व्याख्या अपि वर्तते। देवालयो हिन्दुसंस्कृतेः धर्मदर्शनयोः मन्त्रतन्त्रयोः यज्ञचिन्तनयोः पुराणकाव्ययोः आगमनिगमयोः मूलभूततत्त्वानां मूर्तरूपं वर्तते। भारतीयस्थापत्यं देवहेतुकं वर्तते अत एव भारतीयस्थापत्यस्य पराकाष्ठा देवालयेष्वेव दृश्यते। देवालयस्य पाषाणभवने धर्मदर्शनाभ्यां प्राणाः सञ्चारिताः। भारतीयदर्शनानुसारं जीवनस्य साफल्यार्थं लौकिकाभ्युदयापेक्षया पारलौकिकयशसः प्राधान्यं वर्तते। पारलौकिकं निश्रेयसं प्राप्तुं निर्दिष्टेषु देवालयनिर्माण-मन्त्रोच्चारण-यज्ञ-चिन्तन-ध्यान-योग-वैराग्य-जप-तप-तीर्थाटनदेवदर्शनादिषु नानामार्गेषु प्रासादनिर्माणमप्येको विशिष्टतमो मार्गो वर्तते। मानवस्य बौद्धिकाध्यात्मिकक्षमतासु भेदत्त्वात् विभिन्नानां साधनानामुदयो जातः। परञ्च सर्वेषु मार्गेषु प्रासादनिर्माणस्य महत्त्वं विशिष्टतमं वर्तते यतो हि सर्वे जनाः बौद्धिकाध्यात्मिकक्षमतायुक्ताः साधारणबुद्धिमन्तः वा सर्वेऽपि देवालयमागत्य देवं सेवन्ते। सर्वेषां साधनापथः देवालय एव वर्तते।

अत एव वैदिककालीनदेवालयः केवलं मन्दिरमेव, इत्येव वक्तुं न शक्यते। देवालयरूपात्मकानां मन्दिराणां निर्माणं वैदिकयुगानन्तरमेव आरब्धम्। सर्वप्रथमं ब्रह्माविष्णुशिवानामेव स्थापना प्रमुखदेवत्वेन मन्दिरेषु जाता। कालान्तरे ब्रह्मणः महत्त्वं न्यूनमभवत्। यतोहि पौराणिकयुगे एको नूतनो विचार आगतो यत् ब्रह्मणः स्तुत्या एव दैत्यानां बलवृद्धिर्जायते। अतः शनैः शनैः ब्रह्मणः पूजने न्यूनता जाता।

10. वाचस्पत्यम्-भाग 6, पृ. 4530, सं. श्री तारानाथ तर्कवाचस्पति, चौखम्बा संस्कृत सीरीज, वाराणसी-1962ई.
11. शब्दकल्पद्रुम-भाग 3, पृ. 365, राधाकान्त देव राज, शब्दकलपद्रुम, चौखम्बा संस्कृत सीरीज, वाराणसी - 1967ई.
12. भारतीयस्थापत्यम्-पृ. 209, पृ. 209 द्विजेन्द्रनाथशुक्ल, हिन्दी समिति, सूचना विभाग, लखनऊ - 1968ई.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मन्दिरमागत्य भक्तजनाः स्वेष्टदेवं प्रार्थयन्ति स्म। अनेन सामूहिकपूजनस्य नूतना परम्परा आरब्धा ततो भक्तिमार्गस्य विकासोऽभवत्। श्रीमद्भागवतपुराणे विष्णुना कथ्यते यत्–

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥[13]

अतो भक्तप्रियभावत्वात् विष्णुः वैदिकदेवेषु सर्वप्रियोऽभवत्। विशेषतया भारतस्योत्तरभूभागे विष्णुमन्दिराणां निर्माणमभवत्। एवमेव भारतस्य दक्षिणभूभागे शैवमन्दिराणां शुभारम्भो जातः। विष्णुमन्दिरेषु शिखरस्य प्राधान्यमासीत् यद्यपि शिवमन्दिरेषु शिखरस्य स्थाने स्तूपस्याविर्भावो जातः। मन्दिरस्य शिखरो दूरादेव भगवतः सर्वोच्चतामुद्घोषयति। यस्य सामीप्यं प्राप्य मनसि भक्तिभावना उत्पद्यते।

प्रासादस्य वास्तु साधारणजनभवनेभ्यः विशिष्टो वर्तते। मन्दिरे विभिन्नोत्कीर्णाकृतयः पशुपक्षिपुष्प-पौराणिकदृश्यादयः तत्कालीनसमाजस्य चित्रणं कुर्वन्ति। कामोत्तेजकप्रसङ्गैः दुष्टासुरीकृत्यानां चित्रणं वर्तते। जनाः मन्दिरमागत्य एव जीवनदर्शनस्य आध्यात्मिकचिन्तनस्य च ज्ञानं प्राप्नुवन्ति स्म। प्राच्यभारते मन्दिरनिर्माणाय शैली द्वे विकसिते नागरद्राविडश्चेति। नागरशैली भारतस्योत्तरभूभागे द्राविडशैली दक्षिणभूभागे च प्रावर्धत्। अनयोः मिश्रणं 'वेसर' इति कथ्यते। मध्यभारते वेसरप्रासादानामेवाधिक्यं वर्तते।

भारतस्य देवालयान् दृष्ट्वा मनसि प्रश्नो भवति यत् कदा कथञ्च देवालयस्थापत्यस्योद्भवो जातः। अस्मिन् विषये यदा विचारः क्रियते तदा ज्ञायते यत् मानवसभ्यतायामारम्भकालादेव मानवस्यादृष्टशक्तौ श्रद्धाभावो दृश्यते। तेन मानवेन स्वभावनां प्रकटीकर्तुमेव वृक्षाणां प्राकृतिकपदार्थानां सूर्यचन्द्रादीनामूर्तिरूपेण पूजनं कृतम्। ईश्वर इयं भावना सनातनकालदेव आसीत् परञ्च शनैः शनैः परिवर्तनमपि जातम्। यदा मानवः काननेषु कुञ्जरेषु-पर्वतशिखरेषु वसति स्म तदा तस्य ईश्वरोऽपि तत्रैव आसीत्। यदा तेन स्वस्मै निवासभवनानि निर्मितानि तदा वसतिष्वपि मन्दिराणि निर्मितानि। वैदिकयुगे प्रायशो मन्दिराणामभाव दृश्यते यतोहि वैदिकयुगः स्तुतेः यज्ञस्य चिन्तनस्य च आसीत्। अतो वैदिकयुगं स्तुतिप्रधानं यज्ञप्रधानं चिन्तनप्रधानमिति नास्ति अतिश्योक्तिपूर्णम् परञ्च यज्ञपरपम्परायाः यन्महत्वं ब्राह्मणकाले सर्वोच्चशिखरे आसीत् स एव आरण्यकोपनिषत्कालेऽपि भूमावागतम्।

तस्मिन्नेव काले बौद्धजैनधर्मयोरुदयत्वात् यज्ञबहुलहिंसासमन्वितवैदिकधर्मस्य ह्रासो जातः। भारते ब्राह्मणधर्मस्य सनातनधर्मस्य वा हासं अवरोद्धुं पौराणिकधर्मस्योदयोऽभूत्। पौराणिकधर्मे प्रतिमापूजनस्य विशिष्टं स्थानमासीत्। अतः पौराणिकधर्मस्योदयत्वात् भारते आहिमालयात् कन्याकुमारीं यावत् मन्दिराणां स्थापना अभवत्। कालान्तरे तान्येव मन्दिराणि तीर्थानि जातानि। वस्तुतस्तु देवालयवास्तोर्विकासो वेदीरचनया जातः। वैदिककालीनयज्ञवेद्ययामेवास्य मूलं निहितमस्ति।

पातञ्जलमहाभाष्येऽपि देवप्रसादस्य निर्देशः प्राप्यते[14]। तत्र प्रासादभूमिकायाः वर्णनं क्रियते। आङ्गलविद्वान् "राइस् डेविड्स्" महोदयानुसारं देवालयशब्दस्यार्थः–

13. श्रीमद्भागवतपुराण–9/4/63, 9.4.63, सं. रामतेज पाण्डेय, पंडित पुस्तकालय, काशी – 1952ई.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

"A long storied Mansion or the whole of an upper story or the storied building.[15]

एवमेव ''मयमतम्'' ग्रन्थस्य द्वितीयाध्याये वर्ण्यते यत् सभा-शाला-प्रपा-रङ्गमण्डपं मन्दिरञ्च पञ्चैतानि प्रासादाः कथ्यन्ते। यथोक्तम्-

सभा शाला प्रपा रङ्गमण्डपं मन्दिरं तथा।
प्रासाद इति विख्याप शिविका गिल्लिका रथम्।
स्यन्दनं चैवमानीक यानमित्युच्यते बुधैः॥[16]

एतानि भवनानि वस्तुतो दक्षिणात्यप्रसादस्यावयवभूता एव। अतः ''प्रासाद'' शब्दोऽयं प्रासादाङ्गभूतभवनेभ्यो मण्डपशालासभाशालादिभ्योऽपि प्रयुज्यते। यथोक्तमाङ्गलविदुष्या श्रीमतीस्टैलाक्रैम-रिशमहोदयया-

"They are part of the whole establishment of a south Indian temple. The Meaning of a south Indian temple. The Meaning of a PRASADA is extenoled here from temple itself to the Various halls etc. which are attached to it.[17]

देवालयस्य कृते ''विमानम्'' शब्दोऽपि प्रयुज्यते। ''वि'' उपसर्गपूर्वकं ''मा'' धातोः ल्युट् प्रत्यये सति निष्पन्नोऽयं शब्दो विमानम्। यथोक्तम्-

नानामानविधानत्वाद् विमानं शास्त्रतः कृतम्।[18]

विमानस्य जन्मविषये वर्ण्यते यत् प्राचीनकाले ब्रह्मा देवेभ्यः पंचविमानानां रचनां चकार। येषां नामानि वैराज-कैलास-पुष्पक-मणिक-त्रिविष्टपादयः। ब्रह्मा स्वर्णनिर्मितविमानेषु वैराजः स्वस्मै, कैलासः शङ्कराय, पुष्पकं कुबेराय, मणिकं वरुणाय, त्रिविष्टपं इन्द्राय च वितरितवान्। आङ्गलविदुषी श्रीमतीस्टेलाक्रैमरिशमहोदयानुसारं-

"Vimana is the name of the temple built according to tradition by the appilcation of various proportionate measurement or various stranderd of proportionate measeurement.[19]

मानसारेऽपि एकतालादारभ्य द्वादशतलात्मकभवनानां देवालयानाञ्च विमान संज्ञा वर्तते।[20] अतो विमानं देवभवनमेव। भारतीयस्थापत्ये मन्दिरनिर्माणस्य शैली-द्वयं वर्तते। प्रथमा नागरशैली

---

14. पातञ्जलमहाभाष्यम् - 2/2/34, भाण्डारकर ओरियण्टल, रिसर्च इस्टिट्यूट, पूना
15. भारतीयस्थापत्यम् - पृ. 222 (उद्धृतम्), द्विजेन्द्रनाथशुक्ल, हिन्दी समिति, सूचना विभाग, लखनऊ - 1968ई.
16. मयमतम् - 2/6-7, सं. शैलजा पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी - 2007ई.
17. भारतीयस्थापत्यम् - पृ. 226 (उद्धृतम्), द्विजेन्द्रनाथशुक्ल, हिन्दी समिति, सूजना विभाग, लखनऊ - 1968ई.
18. तत्रैव - पृ. 227 (उद्धृतम्)
19. तत्रैव
20. मानसार - 18/13-87, सं. प्रसन्न कुमार, अपेरियण्टल बुक रिप्रिंट करपोरेशन, नई दिल्ली - 1997ई.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

द्वितीया द्राविडशैली च। तत्रापि नागरशैल्याः ख्यात्युत्तरीपरम्परायां द्राविडशैल्या दक्षिणीपरम्परायाञ्च वर्तते।

ऋग्वेदेऽपि त्रिभौमिकप्रासाद-सहस्रस्तम्भीयप्रासादादिविषयकी च चर्चा समुपलभ्यते।[21] वसिष्ठस्य कामनाऽपि सहस्रस्तम्भीयभवनाय दृश्यते।[22] सिन्धुसभ्यतायाः सम्यक् परिशीलनेन ज्ञायते यत् तस्मिन् काले भारतस्य निवासीनां पूजापद्धतिः प्रतीकोपासनारूपेण प्रतिष्ठिता आसीत्। कालान्तरे "स्वर्गकामो यजेत्[23]" इत्यस्य प्रसिद्धिर्जाता। वैदिकीययज्ञवेदी प्रासादवास्तोः मूलत्वेन स्मर्यते। तत्र वेद्याधिष्ठानमेव प्रासादस्य वास्तविकाधारो जातः। यथा वेद्यां चितेर्निर्माणं भवति तथैव प्रासादेषु जगत्या अधिष्ठानस्य वा निर्माणं भवति। श्रीमती स्टेला क्रैमरिशमहोदयानुसारं "मन्दिरस्य शरीरस्थापनायां वैदिकचितिरेव हेतुर्वर्तते[24]।" वैदिककाले काष्ठचतुष्ट्येन यत् मण्डपं निर्मीयते स्म तत् मण्डपमेव कालान्तरे मन्दिररूपेण परिणतमभवत्। वेदीभूषा एव कालान्तरे शिखरभूषासु परिवर्तिताः। आगमसाहित्ये मन्दिरस्य वर्णनं पर्वतरूपेणापि प्राप्यते। प्राचीनमन्दिराणां नामान्यपि पर्वतानाधारीकृत्यैव वर्तन्ते यथा शिवस्य कैलाशः।

समराङ्गणसूत्रधारे मेरुः "प्रासादराज" इत्युक्तम्। पर्वतेषु स एव पर्वतराजः। अतः प्रासादनिर्माणेऽपि गिरिकन्दरानां महत्वं वर्तते नाऽत्र सन्देहलेशोऽपि। वैदिककालात् पूर्वमेव वास्तुकलायाः प्रारम्भो जातः। मध्यकालीनकृतिषु समराङ्गणसूत्रधार-अपराजितपृच्छा-तन्त्रसमुच्चयादिषु ग्रन्थेषु प्रासादवास्तोः चरमोत्कर्षो दृश्यते। तदनन्तरं प्रासादपरम्परायां न केवलं प्रासादे प्रतिष्ठायाः प्रतिमायाः पूजनमारब्धं, अपितु प्रासादोऽपि जनानां श्रद्धाकेन्द्रं जातम्। तस्मिन् काले एव "स्वर्गार्थी देवालयं कारयेत्" इत्थं नूतनां चेतना प्रस्फुटिता।

प्रासादवास्तोर्महत्वं ऋषिभिर्ग्रन्थेषु बहुलापि वर्ण्यते। मन्दिरनिर्माणं पूर्तकर्मसु परिगण्यते। अतो जलाशयवृक्षादिभिः युतमन्दिरस्य निर्माणेन इष्टापूर्तफलप्राप्तिर्भवति। यथोक्तमपराजितपृच्छायाम्-

सुरालयविभूत्यर्थं भूषणार्थं पुरस्य तु।
नराणां भुक्तिमुक्त्यर्थं सत्यार्थं चैव सर्वदा॥

लोकानां धर्महेतुश्च क्रीडाहेतुश्च स्वर्भुवाम्।
कीर्तिरायुर्यशोऽर्थं च राज्ञां कल्याणकारकः॥[25]

अत एव नगरभूषणार्थं, मनुष्याणामैश्वर्यर्थं, भुक्तिमुक्त्यर्थञ्चदेवानां क्रीडास्थानत्वेन कीर्तिरायुष्ययशवृद्धये च देवालयाः निर्मीयन्ते। वस्तुतो देवालयनिर्माणं धर्मकर्त्तव्यमिति मन्यते। अग्निपुराणे

21. ऋग्वेदसंहिता - 8/41/9, 7/86/1, सं. सांतलेकर, स्वाध्यायमण्डल, भारतमुद्रणालय, मुम्बई - 1996 सम्वत्
22. ऋग्वेदसंहिता - 7/86-88 सं. सांतवलेकर, स्वाध्ययमण्डल, भारतमुद्रणालय, मुम्बई - 1996 सम्वत्
23. अथर्वसंहिता - पृ. 16, सं. रामस्वरूप शर्मा, चौखम्बा विद्याभवन, वाराणसी - 2007ई.
24. भारतीयस्थापत्यम् - पृ. 269, द्विजेन्द्रनाथ शुक्ल, हिन्दी समिति, सूचना विभाग, लखनऊ - 1968ई.
25. अपराजितपृच्छा - 115/3-4, सं. पी.ए. मांक्ल, गायकवाड़ओरियण्टल, सीरीज, बड़ौदा - 1950 ई.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तु देवालयनिर्माणस्य फलश्रुतिरपि सविस्तरेण प्राप्यते। तत्र वर्ण्यते यत् मनसि अपि यो देवालयनिर्माणं चिन्तयति तस्य शतजन्मनः पापानां नाशो भवति। यथोक्तम्–

मनसा सद्मकर्तृणां शतजन्माघनाशनम्।
येऽनुमोदन्ति कृष्णस्य क्रियमाणं नरा गृहम्।।[26]

यत् फलं यज्ञादिभिर्न प्राप्यते तत् फलं मन्दिरस्य निर्माणेन प्राप्यते। मन्दिरनिर्माणस्य फलं सर्वेषु तीर्थेषु कृतस्नानतुल्यं भवति। यथोक्तम्–

फलं यन्नाप्यते यज्ञैर्धाम कृत्वा तदाप्यते।
देवागारे कृते सर्वतीर्थस्नानफलं लभेत्।।[27]

ये बालकाः क्रीडमानाऽपि पांसुना मन्दिरं निर्मान्ति तेऽपि विष्णुलोकं प्राप्नुवन्ति। यथोक्तम्–

बात्ये तु क्रीडमाना ये पांसुभिर्भवनं हरेः।
वासुदेवस्य कुर्वन्ति तेऽपि विष्णुलोकगामिनः।।[28]

एकस्मिन् स्थले तु मन्दिरनिर्माणस्य फलं कीर्तनदानाभ्यामपि श्रेष्ठमुक्तम्। यथोक्तम्–

दानेनयज्ञाधिकं यस्मात्कीर्तनेभ्यो वरं यतः।
अतश्च कारयेद्धीमान् विष्ण्वादेर्मन्दिरादिकम्।।[29]

वस्तुतो देवालयनिर्माणं लोकोपकारकं वर्तते यतो हि देवालयस्य मण्डपे सर्वे जना निर्धनाः धनिकाः वा मिलित्वा भगवतः पूजनार्चनं कुर्वन्ति। अनेन पारस्परिकसद्भावना उत्पद्यते, अतो मन्दिरनिर्माणेन लौकिकं पारलौकिकञ्च सुखं प्राप्यते। यथोक्तम्–

कृत्वा प्रभूतं सलिलमारामान् विनिवेश्य च।
देवतायतनं कुर्याद्यशोधर्म्माभिवृद्धये।
इष्टापूर्तेन लभ्यन्ते ये लोकायस्तान् विभूषितः।
देवानामालयः कुर्याद् द्वयमप्यत्र दृश्यते।।[30]

अनेन प्रकोरण वक्तुं शक्यते यद् भारतीयप्रासादविज्ञानं न केवलं भवननिर्माणस्य विज्ञानमात्रमेव अपितु प्रासादनिर्माणानां पृष्ठभूमौ यानि दार्शनिकतत्वानि निहितानि सन्ति तान्येव भारतीयस्थापत्यस्य विशेषतां बोधयन्ति।

---

26. अग्निपुराणम् – 38/2, सं. तारिणीशझा, हिन्दी साहित्य सम्मेलन, प्रयाग, 1985ई.
27. तत्रैव – 38/6, सं. तारिणीशझा, हिन्दी साहित्य सम्मेलन, प्रयाग, 1985 ई.
28. तत्रैव – 38.13, सं. तारिणीझा, हिन्दी साहित्य सम्मेलन, प्रयाग, 1985 ई.
29. तवैव – 38/26, सं. तारिणीशझा, हिन्दी साहित्य सम्मेलन, प्रयाग – 1985 ई,
30. बृहद्वास्तुमाला – पृ. 160, सं. रामनिहोर द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी – 2001 ई.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वास्तुनि दार्शनिकतत्त्वानि

डॉ. सच्चिदानन्दस्नेही

ॐ वास्तुदेवा नमस्तेऽस्तु भूशय्याभिरतं प्रभो।
मद् गृहं धन-धान्यादिसमृद्धं कुरु सर्वदा।।[1]

लोके वास्तुशास्त्रस्य दर्शनस्य च परिचर्चा सर्वत्र श्रूयते अतः जिज्ञासा जायते यत् किं नाम वास्तुशास्त्रम्? तत् कतिविधम्? किं नाम दर्शनम्? वास्तुविज्ञानस्यापि दर्शनं किमपि अस्ति न वा? वास्तुशास्त्रेण सह दर्शनस्य कः सम्बन्धः? किं भवननिर्माणशास्त्रमेव वास्तुशास्त्रम्? किं भवननिर्माणाय वास्तुशास्त्रस्य विधीनां परिपालनमनिवार्यम्? वास्तुविज्ञानस्य पर्यावरणविज्ञानेन सह कः सम्बन्धः? इत्यादयः बहवः प्रश्नाः मनसि समागच्छन्ति। कथमेतेषां प्रश्नानां समाधानं भवेत्? कदाचित् वास्तुशास्त्रे अन्तर्निहिते दर्शनस्य तत्त्वज्ञानेनैव सर्वेषां प्रश्नानां समाधानं भवेत्। अतः वास्तुशास्त्रे सन्निहिते दर्शनस्य ज्ञानाय अत्र चर्चा प्रस्तूयते।

ननु नानाविधदुःखैः संपीडिताः स्वभविष्यज्ञातुकामाः इष्टप्राप्त्यर्थमनिष्ट- परिहारार्थमुद्यताः जनाः निःश्रेयसपथप्रदर्शकं प्रामाणिकं ज्योतिषशास्त्रमभिलषन्ति। सम्प्रति लोके सर्वाषु अर्थकरीषु विद्यासु ज्योतिर्विद्या अन्यतमा। ज्योतिर्विद्यायाः **सैद्धान्तिकं ज्योतिषं, फलित-ज्योतिषं, खगोलविज्ञानं, सामुद्रिकशास्त्रं, वास्तुशास्त्रमित्यादयः बहवा आनुषङ्गिकाः विषयाः अवान्तरपक्षाः वा सन्ति।** तेषु वास्तुशास्त्रस्य स्थानं महत्वपूर्णं वर्तते। अन्याषु ज्योतिर्विद्याषु जनाः केवलं स्वमङ्गलकामनावशात् प्रवर्तन्ति परञ्च वास्तुशास्त्रे स्वस्य कल्याणेन सह परेषामभ्युदयमपि अभिलषन्ति यतोहि वास्तुशास्त्रं पर्यावरणविज्ञानमपि वर्तते। जनाः पर्यावरणस्य संरक्षणं विना स्वयं निःश्रेयसं नैव प्राप्तुं शक्नुवन्ति। वास्तुशास्त्रं न केवलं भवननिर्माणशास्त्रमस्ति अपितु पर्यावरणविज्ञानमपि वर्तते। वास्तुशास्त्रस्य दर्शनेनैतत् सर्वं विज्ञातं भवति। समानभावः वास्तुशास्त्रे अपि मङ्गलकामनारूपेण उक्तम् -**वास्तुशास्त्रं प्रवक्ष्यामि लोकानां हितकामनया**[2]। उक्तञ्च-

प्रकृतिः पञ्चभूतानि ग्रहाः लोकाः स्वरास्तथा।
दिशः कालश्च सर्वेषां सदा कुर्वन्तु मङ्गलम्।।

---

1. मङ्गलाचरणम् ''सरल गृह वास्तु'' (हिन्दी सं.), लेखकः -प्रमोद कुमार सिन्हा, अ. भा. ज्यो. सं.संघ, नयी दिल्लीतःप्रका. दि0 संस्करणम् 2010।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वास्तुशास्त्रस्य विषये हलायुधकोषे उक्तम्-

वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम्।
ईशानकोणादारभ्य ह्येकाशीति पदे त्यजेत्।।[3]

वास्तुशास्त्रस्यापि समुन्नतं दर्शनं वर्तते, यतो हि दर्शनविहीनं तु न कोऽपि विषयो वर्तते। अमरकोषे वास्तुपदस्य अर्थमुक्तम्-**''गृहरचनाऽवच्छिन्न भूमौ''**। अर्थात् गृहरचनायोग्यमवछिन्नं भूमिं **'वास्तु'** पदेनोच्यते। जैनदर्शने तु-**'अनन्तधर्मकं वस्तु'**[4]। वस्तूनां (द्रव्याणां) सामञ्जस्यं **'वास्तु'** इति। वस्तुतः वस्तूनां विज्ञानमेव वास्तुशास्त्रमिति। अतः पञ्चमहाभूतानां सामञ्जस्यपूर्ण समानुपातिकं सम्मिश्रणं वास्तु पदेनोच्यते। पाञ्चभौतिकमेव मानवस्य शरीरमपि। शरीरस्य लक्षणमुक्तं न्यायसूत्रकारेण- 'चेष्टेन्द्रियार्थाश्रयः शरीरम्'[5]। मानवस्य शरीरस्योत्पतिः पञ्चभूतानां सम्मिश्रेणैव, विनाशश्च पञ्चभूतानां विभागेन जायते। तद्यथा-

शरीरस्य निर्माणप्रक्रिया=(आकाशः + अग्निः + वायुः + जलम् + पृथ्वी)

देहस्य ध्वंसप्रक्रिया = (शरीरं-वायुः-जलम्-अग्निः-पृथिवी-आकाशः)

वस्तुतः शरीरे पञ्चमहाभूतानां स्थितिः प्रत्यक्षप्रमाणेन सर्वसिद्धमेव। मानवशरीरस्य मस्तिष्के आकाशस्य, बाहौ अग्नेः, नाभौ वायोः, पादयोः पृथिव्याः, पादान्ते सर्वशरीरे च जलस्य वासो वर्तते। चैतन्यं तु आत्मनि वसति। कविवर-गोस्वामी-तुलसीदासेनापि उक्तम् 'रामचरितमानसे'-

छिति-जल-पावक-गगन-समीरा। पञ्चतत्वमय अधम शरीरा।।

जनाः दुःखेभ्यः निवृत्तिः सुखप्राप्तिश्च वाञ्छन्ति। तत् सर्वं तु शरीरमाध्यमेन प्राप्तुं शक्यते। उक्तञ्च **''शरीरमाद्यं खलु धर्मसाधनम्''** इति। तथा च पुरुषार्थचतुष्टयाणां धर्मार्थकाममोक्षाणां सिद्धेर्मूलमारोग्यमेव। वास्तुशास्त्रानुपालनेन पञ्चतत्त्वानां सामाञ्जस्येन च आरोग्यादिकं सर्वं सुखं भवति। लोके सर्वं सुखम् आरोग्येन धनेन धर्मेण च । आरोग्यं धनं च सुखाय अनिवार्यम्। एतत् सर्वं प्राप्त्यर्थं वास्तुशास्त्रमेव मार्गप्रदर्शकं शास्त्रमस्ति। अतएव महाभारते भूलोकस्य षट्सुखवर्णने व्यासेन आरोग्यं प्राधान्येन व्यपदिश्यते-

अर्थागमो नित्यमरोगिता च, प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या, षट् जीवलोकस्य सुखानि राजन्।।

---

2. विश्वकर्माप्रकाशात्।
3. ''सरल गृह वास्तु'' (हिन्दी सं.), पृ.सं. 2 लेखकः -प्रमोद कुमार सिन्हा, अ. भा. ज्यो. सं.संघ, नयी दिल्लीतःप्रका. दि0 संस्करणम् 2010।
4. तत्त्वार्थसूत्रम् आचार्य उमास्वामीना प्रणीतः।
5. न्यायसूत्रम् 1.1.11

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

विविधानि च भौतिकानि सुखानि, नानाविधभोज्यानि सांसारिकविषयभोगविलासाः वास्तुशास्त्रस्य विधीनां परिपाल्य निर्मिते गृहे एव प्राप्तुं शक्नुवन्ति।

ननु किं नाम वास्तुशास्त्रं यं लोककल्याणाय परिकल्प्यते? किं वा तस्य दर्शनम्? समाधत्तेवस्तूनामनुशासनमेव वास्तुशास्त्रम्। वस्तूनां सामञ्जस्यं विधायकं शास्त्रं वास्तुशास्त्रम्। शास्ति च त्रायतेऽन्वेतीति शास्त्रम्। **'शासु'**[6] अनुशिष्टौ आज्ञायां वा, **'शंसु'**[7] स्तुतौ प्रकटने वर्णने चेति धातुभ्यां शास्त्रशब्दस्य व्युत्पत्तिर्जायते। आगमपरम्परायां शास्त्राणां व्युत्पत्तिः लक्षणञ्च प्राप्यते। तद्यथा-

शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।
शासनं द्विविधं प्रोक्तं शास्त्रलक्षणवेदिभिः।
शंसनं भूतवस्त्वेकविषयं न क्रियापरम्।[8]

अतः लोककल्याणाय अन्तः वस्तूनां बाह्यपर्यावरणेन सह सामञ्जस्यं विधायकमुपायशास्त्रं वास्तुशास्त्रमित्युच्यते। अभीष्टफलप्राप्त्यर्थमनीष्टपरिहारार्थं वास्तुशास्त्रस्य नियमानां परिपालनमवश्यमेव करणीयम् । यथोक्तं शास्त्रकारैः-

यः शास्त्रविधिमुत्सृज्य प्रवर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।।[9]

तथा च विधिनिषेधयोः भेदेन श्रुतिस्मृत्यादिग्रन्थेषु प्रतिपादितं शास्त्रं द्विविधं प्रोक्तम्। वास्तुविज्ञानमपि विधिनिषेधमुखेन लोककल्याणाय जनानुपदिशति। यथोक्तम्-

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।।[10]

शास्त्राणां प्रामाण्यं तु श्रुतित्वात् । श्रुतीनां प्रामाण्यमपौरुषेयत्वात्। वास्तुशास्त्रस्यापि प्रामाण्यं

---

6. "संस्कृतधातुकोषः", विस्तृतभाष्यार्थसहितः, पं0 युधिष्ठिरो मीमासंकः, पृ. सं. 118, प्र0 रामलाल कपूर ट्रस्ट, सोनीपत, हरियाणा।
7. "संस्कृतधातुकोषः", विस्तृतभाष्यार्थसहितः, पं0 युधिष्ठिरो मीमासंकः, पृ. सं. 120, प्र0 रामलाल कपूर ट्रस्ट, सोनीपत, हरियाणा।
8. "भारतीयदर्शन", बलदेव उपाध्याय, पृ. सं. 03, शारदा मन्दिर ,वाराणसी।
9. "श्रीमद्भगवद्गीता" शाङ्करभाष्यार्थसहितः, श्लोक सं0 16.23 एवं 16.24, गीताप्रेसगोरखपुरतः प्रकाशितं संस्करणम्, सं0 2065.
10. "श्लोकवार्तिक", कुमारिलभट्ट, श्लोक सं0 05.

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

श्रुतिमूलकत्वात्। यथोक्तं- **'धर्मजिज्ञासमानानां प्रमाणं परमं श्रुतिः।'**[11] वास्तुशास्त्रस्य मूलोद्गमस्थानं तु ऋग्वेदस्य पुरुषसूक्ते प्राप्यते। अस्य वास्तुशास्त्रस्य दर्शनमुपनिषदः निर्गतः। वास्तुशास्त्रस्यापि तत्त्वमीमांसा-ज्ञानमीमांसा, नीतिमीमांसाश्चेति त्रिविधं दार्शनिकं विभाजनं वर्तते। वास्तुशास्त्रपर्यावरणविज्ञानयोः वैदिकदर्शनेन सह अन्तःसम्बन्धो अपि वर्तते। वास्तुशास्त्रस्य तत्त्वमीमांसायां प्रथमं ज्ञातव्यानि तत्त्वानि कानि सन्ति येषां तत्त्वज्ञानेन वास्तुशास्त्रस्य सम्यक्ज्ञानं भवेत्?

वास्तुशास्त्रे **पृथिव्यपस्तेजवाय्वाकाशकालदिकात्ममनांसीति नव तत्त्वानि** परिज्ञातव्यानि सन्ति। न्यायदर्शने एतानि तत्त्वानि द्रव्यपदार्थे सन्निहितानि सन्ति। तेषां तात्त्विकं विवेचनं तर्कसङ्ग्रहादिन्यायग्रन्थेषु विस्तरेण प्राप्यते। तत्र पञ्चमहाभूतैः सह दिक्कालात्ममनसां विवेचनं विस्तरेण क्रियते। पञ्चमहाभूतेभ्यः उत्पत्तिमानत्वात् संसारः प्रपञ्चेति नाम्ना विख्यातो अस्ति।

पञ्चमहाभूतानां विषये प्रायः सर्वे जनाः जानन्ति एव यतो हि तेषां स्थूलभूतानां लोकेऽस्मिन् सर्वत्र सर्वेषां कृते समानोपलब्धिर्भवत्येव। कानि पञ्चमहाभूतानि? किञ्च तेषामस्माकं जीवने उपयोगिता? सर्वशास्त्रेषु आयुर्वेदशास्त्रे, आधुनिकचिकित्साविज्ञाने, मनोविज्ञाने, आध्यात्मजगति, धर्मशास्त्रे, सर्वदर्शने, योगविज्ञाने वा **'पञ्चमहाभूतेभ्यः निर्मितमस्माकं शरीरमिति'** स्वीकृतः सर्वतन्त्रसिद्धान्तोऽस्ति।

भारते वैदिकदर्शनोत्थानकालादेव **वास्तुशास्त्रस्य पद्धतिरेषा** समुन्नताः आसीत्। वेदेषु प्रतिपादितं सृष्टेः उत्पत्तिप्रक्रियां **'त्रिवृकरणं'**, वेदान्तदर्शने प्रतिपादितं **'पञ्चीकरणं'**, भारतीयदर्शनेषु पञ्चमहाभूतानां निरूपणं चास्य प्रमाणमस्ति। पञ्चमहाभूतविषयकदर्शनं न्याय[12] वैशेषिकवेदान्तादिषु भारतीयदर्शनेषु बहुधा वर्ण्यते। यथा-वेदान्तदर्शने पञ्चीकरणसिद्धान्तः। यथोक्तं वेदान्तसारे-**''स्थूलभूतानि तु पञ्चीकृतानि।** पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान्प्रत्येकं संयोजनम्।'' तदुक्तं-

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्व-स्वेतर-द्वितीयांशैर्योजनात्पञ्च-पञ्च ते॥[13]

पञ्चीकरणसिद्धान्ते मन्यते यत् पञ्चमहाभूतेषु सर्वेषामपि महाभूतानां सम्मिश्रणमस्ति। **वास्तुशास्त्रे पञ्चमहाभूतानां सम्मिश्रणसिद्धान्तमङ्गीकृत्यैव नैसर्गिकोपचाराः वास्तुदोषनिवारणोपायाः विधीयन्ते।** ***'गृहे वसन्तीति वास्तु'*** इति मन्यमसनसः ते स्वीकुर्वन्ति यत् गृहे (निर्मिते भवने) जडत्वेन

11. ''मनुस्मृतिः'' 2.13 ,''भारतीयदर्शन'', बलदेव उपाध्याय, पृ. सं. 14, शारदा मन्दिर ,वाराणसी।
12. घ्राणरसनचक्षुस्त्वक्श्रोत्रणीन्द्रियाणि भूतेभ्यः। न्यायसूत्रम् 1.1.12.।
पृथिव्यापस्तेजोवायुराकाशमिति भूतानि। न्यायसूत्रम् 1.1.13.।
गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः। न्यायसूत्रम् 1.1.14।
13. वेदान्तसारः, आचार्यसदानन्दप्रणीतम्।
14. सांख्यकारिका ईश्वरकृष्णेन प्रणीता, का. सं. 22

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अङ्गीकृतानि पञ्चमहाभूतानि काल-दिक्-आत्म-मनांसीति नवद्रव्यैः सह चेतनीभूत्वा वसन्ति। पञ्चमहाभूतानां पञ्चीकरणसिद्धान्तस्तु तालिकामाध्यमेन निरूप्यते-

क्र.सं.		पृथिवी	जलम्	तेजः	वायुः	आकाशः
01.	पृथिवी	1/2	1/8	1/8	1/8	1/8
02.	जलम्	1/2	1/8	1/8	1/8	1/8
03.	तेजः	1/2	1/8	1/8	1/8	1/8
04.	वायुः	1/2	1/8	1/8	1/8	1/8
05.	आकाशः	1/2	1/8	1/8	1/8	1/8

वास्तुशास्त्रस्य आधारोऽपि भारतीयं वैदिकं दर्शनमेवास्ति। भारतीयदर्शनेषु पञ्चमहाभूतानां वर्णनं बहुधा प्रतिपाद्यते। यथा-सांख्यदर्शने पञ्चमहाभूतानां उत्पत्तिः मूलप्रकृतौ त्रिगुणविक्षेपात् पञ्चतन्मात्राभ्यः भवति। यथोक्तं सांख्यकारिकायाम् -

प्रकृतेर्महांस्ततोऽङ्कारस्तस्माद् गणश्च षोडशः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥[14]

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।
भूतादेस्तन्मात्रः स तामसः तैजसादुभयम्॥[15]

वास्तुशास्त्रे भूमेः आकृतिमूलकं परीक्षणं वर्गीकरणञ्च प्राधान्येन व्यपदिश्यते। अतः भूमिपरीक्षणं वास्तुशास्त्रस्य प्रधानमङ्गं वर्तते। उक्तञ्च- *'ततो भूमि परीक्षेत वास्तुज्ञानविशारदः'।* वास्तुशास्त्रे भूमिपरीक्षणं वर्गीकरणं च क्रियते। तद्यथा-

सुगन्धा ब्राह्मणी भूमी रक्तगन्धा तू क्षत्रिया।
मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिका॥ -कल्पद्रुम

एवमेव तर्कसङ्ग्रहे पञ्चमहाभूतेषु पृथिव्याः स्वरूपं निरूप्यते- **"तत्र गन्धवती पृथिवी।** सा द्विविधा नित्यानित्या चेति। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्। **शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणम्।** तच्च नासाग्रवर्त्ति। **विषयो मृत्पाषाणादिः।"**[16] बृहत्संहितायामुक्तं यत् न केवलं गृहमपितु गृहस्य पर्यावरणमपि सम्यक् भवेत्-

शस्तौषधिद्रुमलता मधुरा सुगन्धा स्निग्धा समा न सुषिरा च मही नराणाम्।
अप्यध्वनिश्रमविनोदमुपागतानां धत्ते श्रियं किमुत शाश्वतमन्दिरेषु॥
-बृहत्संहिता

15. सांख्यकारिका ईश्वरकृष्णेन प्रणीता, का. सं. 25
16. तर्कसङ्ग्रहः अन्नंभट्टेन प्रणीतः, मूलपाठात्।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वास्तुशास्त्रे पृथिवी प्रथमं तत्त्वम्। वस्तुतः चराचरसंसारस्य स्थितिः भूमौ वर्तते। भूमिं विना गृहस्य स्थिति अकल्पनीया। अतः वास्तुशास्त्रस्य आधारो **'पृथिवीतत्त्वम्' अङ्गीक्रियते।** अतः अथर्ववेदे उक्तं- ***'माताभूमिः पुत्रोऽहं पृथिव्याः'।*** तर्कभाषायां पृथ्वीविषये वर्ण्यते-''**तत्र पृथिवीत्वसामान्यवती पृथिवी, काठिन्यकोमलत्वाद्यवयवसंयोग विशेषेणयुक्ता। घ्राण- शरीर -मृत्पिण्ड-पाषाण-वृक्षादिरूपा। रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व- संयोग- विभाग-परत्व-** अपरत्व-गुरूत्व-द्रवत्व-संस्कारवती। द्विविधायाः पृथिव्याः रूप-रस-गन्ध-स्पर्शा- अनित्याः पाकजाश्च। पाकस्तु तेजः संयोगः, तेन पृथिव्याः पूर्व रूपादयो नश्यन्त्यन्ये जन्यन्त इति पाकजाः।''[17] जनाः नानाविधभोग्यान् पार्थिवपदार्थान् प्राप्तुकामाः लोके प्रवृत्ताः भवन्ति। न कोऽपि जीवोऽस्ति संसारेऽस्मिन् यः नानाविधपार्थिवपदार्थानां भोगं न करोति। **अतः पार्थिवपदार्थानां सम्यक् उपभोगप्रक्रिया वास्तुशास्त्रे** व्यपदिश्यते।

वास्तुशास्त्रे जलं द्वितीयं तत्त्वम्। जलस्य महात्म्यं सर्वे जानन्ति। उक्तं च- **'जलमेव जीवनम्'। जलं विना जीवनं, गृहं, शरीरं च नैव कल्पयितुं शक्यते। तर्कसङ्ग्रहे** जलस्य स्वरूपमेवं निरूप्यते-''**शीतस्पर्शवत्यः आपः।**..... पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात्। शरीरं वरूणलोके। इन्द्रियं रसग्राहकं रसनम्। तच्च जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।''[18] तर्कभाषायां तु- ''**अप्त्वसामान्य-युक्ता आपः। रसेन्द्रियशरीरसरित्समुद्रहिमकरकादिरूपाः। गन्धवर्जस्नेहयुक्तपूर्वोक्तगुणवत्यः।**'' अतः वास्तुशास्त्रे जलस्य **उत्पत्तिः** (नलकूपादियन्त्रस्य स्थलम्), **संस्थितिः** (जलस्य संग्राहकस्थलस्य स्थितिः), **लयस्थानस्य च** (जलस्य निष्कासनप्रणाल्याः) विवेचनं क्रियते। जलतत्त्वस्य दिक्संयोजनमपि विधीयते।

वास्तुशास्त्रे अग्निः तृतीयं तत्त्वम्। वैदिकसूक्तेषु वेदमन्त्रेषु वा अग्निः प्राधान्येन ('अग्निः ज्योतिः। ज्योतिरग्निः.....' इत्यादिषु मन्त्रेषु) व्यपदिश्यते। तथा च तैतरीयकेऽऽरण्यके आदित्यदेवं (सूर्यं) सौरमण्डलस्य अधिपतित्वेन उक्तम्- ''येनेमा विश्वा भुवनानि तस्थुः।

ततः क्षत्रं बलमोजश्च जातम्॥''[19]

तर्कसङ्ग्रहे तेजसः स्वरूपमेवं निरूप्यते- ''**उष्णस्पर्शवत्तेजः।** पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः। तच्च कृष्णताराग्रवर्ति। विषयश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। **तत्र भौमं वह्न्यादि। दिव्यमबिन्धनं विद्युदादिः। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि।**''[20] **तर्कभाषायामपि**-''तेजस्त्वसामान्यवत् तेजः। चक्षुः

17. तर्कभाषा केशवमिश्रेण प्रणीता, आचार्य विश्वेश्वरस्य हिन्दीव्याख्यानेन विभूषिता, चौ0 सं0 भ0 वाराणसीतः प्रकाशितं संस्करणं वि0 सं0 2057.
18. तर्कसंग्रहः, अन्नंभट्ट प्रणीतः।
19. तैतरीयारण्यकम् 3.11, "Science in Sanskrit" पृ.सं. 01. संस्कृतभारती, नवदेहलीतः प्रकाशितम् सं.2007
20. तर्कसंग्रहः, अन्नंभट्ट प्रणीतः।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शरीरसवितृसुवर्णवह्निविद्युतादिप्रभेदम्। रूप-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग- विभाग-परत्व-अपरत्व-द्रवत्व-संस्कारवत्। नित्यमनित्यञ्च पूर्ववत्।'' ***'अग्निः कल्याणकारिणी तेजस्वीनि च'*** भवेदित्याकाङ्क्षयाः वास्तुशास्त्रानुसारेण गृहे अग्निस्थलं (पाकशालायाः स्थलं दिक्संयोजनादिकं च) **विचिन्त्यते।**

वास्तुशास्त्रे वायुः चतुर्थं तत्त्वम्। 'वायुः प्राणदायिनी' इति सर्वसिद्धं तथ्यम्। तर्कसङ्ग्रहे उक्तम् -**''रूपरहितस्पर्शवान् वायुः-----।** पुनस्त्रिविधः। शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहक त्वक्। तच्च सर्वशरीराग्रवर्ति। विषयो वृक्षादिकम्पन्नहेतुर्वायुः, शरीरान्तस्संचारी वायुः प्राणश्च। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।'' **तर्कभाषायां-''वायुत्वाभिसम्बन्धवान् वायुः।''** त्वगिन्द्रियप्राणवातादिप्रभेदः। स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग- परत्व-अपरत्ववेगवान्। स च स्पर्शाद्यनुमेयः।'' अन्तःकरणशमनाय श्वासप्रश्वासयोः गतिर्विच्छेदरूपप्राणायामः[21] विधीयैते। **कुम्भक-रेचक-पूरक-प्राणायामक्रियया मनः शान्तिः, प्राणवायुसञ्चरणं, रक्तसञ्चरणं, प्राणशक्तिवर्धनं च भवति।'** ***वायुः प्राणदायिनी*** भवेदित्यकाङ्क्षयाः वास्तुशास्त्रानुसारेण गृहे पर्यावरणे च शुद्धप्राणवायोः (आक्सिजन) आगमनं अशुद्धवायोः निष्कासनाय वृक्षोद्यानवातायनादिसंयोजनं **विचिन्तयते।**

वास्तुशास्त्रे आकाशः पञ्चमं तत्त्वम्। तर्कसङ्ग्रहे आकाशनिरूपणं- **''शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।'' तर्कभाषायां-''शब्द-संख्या- परिमाण-पृथक्त्व-संयोग-विभागवत्। शब्दलिङ्गकञ्च।''** गमनागमनविहाररूपक्रियया संगीतमाध्यमेन शुद्धवातावरणे भ्रमणेन सर्व-आकाशादिसंयोगेभ्यः उत्तममारोग्यं प्राप्नुवन्ति। प्रार्थनया आध्यात्मिकं बलमपि प्राप्यते। वास्तुशास्त्रानुसारेण गृहे पर्यावरणे च आकाशस्य (अवकाशस्य) माहात्म्यं अङ्गीकुर्वन्ताः तत्विषयकसंयोजनं रिक्तमुक्तस्थानं **विचिन्त्यते। तत्र गृहे निर्माणस्थले प्राणवायुवाकाशतेजसां संयोजनं प्राप्यते न वा इत्यपि विचार्यते।**

ज्योतिषशास्त्रे वास्तुशास्त्रे च कालतत्त्वमतीवमहत्त्वपूर्णं षष्ठं तत्त्वं वर्तते। वास्तुशास्त्रे कालः षष्ठं तत्त्वम्। कालगणनां विना लोके सर्वेषां स्थितिः **'अन्धवत्'।** अतः ज्योतिषशास्त्रं वेदाङ्गेषु नेत्ररूपेण स्वीक्रियते। **उक्तञ्च-** ***'ज्योतिषमयनं चक्षुः'।*** **भूतभविष्यादिव्यवहारस्यासाधारणं कारणं कालतत्त्वमिति।** तर्कसंग्रहे प्रतिपादितम् -**'कालोऽपि दिग्विपरीतपरत्वापरत्वानुमेयः।** संख्या-परिमाण-पृथक्त्व-संयोग-विभागवान्। एको नित्यो विभुश्च। कथमस्य दिग्विपरीत-परत्वापरतवानुमेयत्वम्। उच्यते-सन्निहिते वृद्धे सन्निधानादपरत्वार्हे तद्विपरीतं परत्वं प्रतीयते। व्यवहिते यूनि व्यवधानात् परत्वार्हे तद्विपरीतमपरत्वम्। तदिदं तत्ता द्विपरीतं परत्वमपरत्वञ्च कार्यं तत्कारणस्य दिगादेरसम्भवात् कालमेव कारणमनुमापयति। स चैकोऽपि वर्तमानातीतभविष्यत्क्रियोपाधिवशाद्

21. तस्मिन् सति श्वासप्रश्वासयोः गतिर्विच्छेदः प्राणायामः। योगसूत्रम् 1.2.49.।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वर्तमानादिव्यपदेशं लभते। पुरुष इव पच्यादिक्रियोपाधिवशात् पाचक-पाठकादिव्यपदेशम् । नित्यत्वविभत्वे चास्य पूर्ववत् । **वास्तुशास्त्रे कालगणनामधिकृत्य शुभमुहुर्तादिविचारः क्रियते। उक्तं च गृहारम्भकालस्य विषये -**

गुरुः शुक्रार्कचन्द्रेषु स्वोच्यादिबलशालिषु।
गुर्वकेन्दुबलं लब्ध्वा गृहारम्भ प्रशस्यते॥[22]

वास्तुशास्त्रे कालवत् दिगपि अतीवमहत्त्वपूर्ण सप्तमं तत्त्वं वर्तते। यतो हि गृहे पञ्चमहाभूतानां संयोजने दिक् एव केन्द्रीयतत्त्वमस्ति। दिगधिकृत्य भूमि-जल-वायु-अग्निनां संयोजनं विधीयते। सा दिक् प्राच्यादिव्यवहारस्य असाधारणकारणत्वेन व्यपदिश्यते। तर्कसंग्रहे प्रतिपादितम्- "**कालविपरीतपरत्वापरत्वानुमेया दिक्**। एका नित्या विभ्वी च संख्या-परिमाणपृथक्त्व- संयोग-विभागवती। पूर्वादिप्रत्ययैरनुमेया । तेषामन्यनिमित्तासम्भवात्। पूर्वस्मिन् पश्चिमे वा देशे स्थितस्य वस्तुनस्तावदवस्थ्यात्। सा चैकापि सवितुस्तत्तद्देशसंयोगोपधिवशात् प्राच्यादिसंज्ञां लभते। वास्तुशास्त्रे षोडश दिक्गणनामधिकृत्य शुभमुहूर्त्तादिविचारः वास्तुदोषोपशमनं च क्रियते। षोडशदिक् नामानि सन्ति-

1. प्राचीकोणम्, 2. कुंडदक्षांसकोणम्, 3. आग्नेयकोणम्, 4. दक्षपार्श्वकोणम्, 5. दक्षिणकोणम्, 6. दक्षश्रेणिकोणम्, 7. नैर्ऋत्यकोगम्, 8. पुच्छकोणम्, 9. प्रतीचिकोणम्, 10. वामश्रेणीकोणम्, 11. वायव्यकोणम्, 12. वामाश्वकोणर्म्, 13. दीचिकोणम्, 14. वामांसकोणम्, 15. ईशान्यकोणम्, 16. पद्ममुखकोणम्।

वास्तुशास्त्रस्य ज्ञानमीमांसायां वास्तुशास्त्रस्य सम्यक्ज्ञानाय 1.आत्मा 2.अन्तःकरणं (मनबुद्धिश्च) चेति तत्त्वद्वयमनिवार्यम्। तद्यथा- ननु वास्तुशास्त्रस्य ज्ञाने किं प्रमाणम्? वास्तुशास्त्रस्य प्रामाण्यं तु श्रुतिमूलकत्वात् आप्तोपदेशत्वाच्च। श्रुतेः प्रामाण्यमपौरुषेयत्वात्। पांचभौतिकवस्तुषु चतुर्णा (पृथिवी-जल-तेज-वायुणां) प्रामाण्यं तु प्रत्यक्षत्वात्। आकाशादीनामनुमानसामर्थ्यात् शब्दप्रमाणत्वाच्च। वास्तुशास्त्रस्य ज्ञानमीमांसायां आत्मनः स्वरूपं स्वीक्रियते। वास्तुशास्त्रस्य सम्यक्ज्ञानं कथं भवेत्? उच्यते- वास्तुशास्त्रस्य तत्त्वज्ञानं तु शास्त्रानुकूलरीत्या अध्ययनाध्यापनपुरस्सरं भवेत्। यथोक्तं दर्शनेषु-

श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपतिभिः।
मत्वा च सततं ध्येयं, एते दर्शनहेतवः॥[23]

वास्तुशास्त्रे गृहपुरुषस्य परिकल्पनात्मकस्वरूपेनैतत् उद्घाटितं भवति यत् 'आत्मा' अपि अष्टमं तत्त्वं स्वीक्रियते। आत्मनः सत्ता तु स्वानुभूतिमूलकत्वात् शब्दप्रमाण्यात् सिद्धमेव। न्यायादिदर्शनेषु

22. ज्योतिष तत्व प्रकाश/श्लोक61/पृष्ठ421
23. भारतीय दर्शन, बलदेव उपाध्याय, उपोद्घात पृष्ठ 14

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अनुमानप्रमाणेनापि सिद्धम्। यतो हि ज्ञानप्रक्रियायां 'आत्मा' मनसा संयुज्यते। मनः इन्द्रियेण सह, इन्द्रियमर्थेन सह। **आत्मत्वाभिसम्बन्धवानात्मा।** सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। तस्य सामान्यगुणाः संख्यादयः पञ्च, बुद्ध्यादयो नव विशेषगुणाः । नित्यत्व-विभुत्वे पूर्ववत्। अन्यत् सर्वं न्यायशास्त्रादिवत्।

वास्तुशास्त्रे गृहपुरुषस्य परिकल्पनात्मकस्वरूपेनैतत् उद्घाटितं भवति यत् 'मन' अपि नवं तत्त्वं स्वीक्रियते। न्यायशास्त्रे उक्तं-**'युगपत्ज्ञानानुत्पतिर्मनसो लिङ्गम्'**[24]। ज्ञानप्रक्रियायां युगपत् ज्ञानानुत्पति निराकरणाय मनसः सत्ता स्वीक्रियते। तर्कसङ्ग्रहे तु -***'सुखाद्युपलब्धिसाधनमिन्द्रियं मनः।'*** उभयेन्द्रियं (ज्ञानेन्द्रियं कर्मेन्द्रियं च) मनः। मनसः कार्यमिच्छोत्पत्तिः (संकल्पविकल्पोत्पत्तिः) वर्तते। तर्कसङ्ग्रहे उक्तम्- **'मनस्त्वाभिसम्बन्धवान्मनः'**। तस्य स्वरूपं- तच्चाणुपरिमाणम्, आत्मसंयोगि, अन्तरिन्द्रियं सुखाद्युपलब्धिकारणं नित्यञ्च। संख्याद्यष्टगुणवत्। तत्संयोगेन बाह्येन्द्रियमर्थग्राहकम्। अतएव सर्वोपलब्धिसाधनम् । **तच्च न प्रत्यक्षम्, अपि त्वनुमानागम्यम्।**

वास्तुशास्त्रस्य नीतिमीमांसायां वैदिकधर्मस्य सद्गुणानां च परिपालनमनिवार्यमस्ति। यतो हि कृतकर्मफलमवश्यमेव भुङ्क्ते- **'अवश्यमेव भोक्तव्यं कृतकर्मफलशुभाऽशुभम्'**। अतः वास्तुशास्त्रे भारतीयदर्शनस्य प्रारब्ध-संचित- क्रियमाणकर्माणां सिद्धान्तमपि स्वीक्रियते। तद्यथा- वास्तुशास्त्रसमन्विते गृहे निवसन् अपि कश्चिद् गृहस्य कर्ता यदि अनैतिकं कर्म करोति (अधर्ममाचरति) चेत् तस्य दण्डात्मकं फलं तु अवश्यमेव भोक्तव्यम्। यदि कश्चित् कारागृहस्य निर्माणं वास्तुशास्त्रानुकूलरीत्या सर्वे जनाः सुखिनः भवन्ति? वस्तुतः न। तत्र बन्धकः (कैदी) दण्डं (दुःखं पीडां) भुङ्क्ते । तथा च तत्रैव अन्तेः निवसन्ताः आरक्षकाः सुखेन वसन्ति । अतः वास्तुशास्त्रस्य नीतिमीमांसायां **धर्माचरणं** प्राधान्येन व्यपदिश्यते।

निष्कर्षतः वयं वक्तुं शक्नुमः यत् वास्तुशास्त्रेण नानाविधोपचारेभ्यः असामान्यसमस्यानां सरलरीत्या अल्पव्ययेन प्राकृतिक-पदार्थानामुपयोगेभ्यः च उपचारं विधीयन्ते। वास्तुशास्त्रस्य तत्त्वमीमांसात्मकं, ज्ञानमीमांसात्मकं, नीतिमीमांसात्मकं दर्शनं च लोके सर्वत्र व्याप्तमस्ति यतोहि दृश्यमानं जगदिदं वास्तुशास्त्रस्य वैदिकदर्शनस्य च समन्वितं नवद्रव्यस्वरूपमेव वर्तते। यथोक्तं सर्वेषां कल्याणाय अस्माकं शास्त्रेषु-

ब्रह्मा मुरारिस्त्रिपुरान्तकारिः, भानुः शशिः भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः, कुर्वन्तु सर्वे मम सुभप्रभातम्॥
सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्॥[24]

---

24. न्यायसूत्रम् 1.1.16

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भूखण्डीकरणविधिः

डॉ. मुरलीकृष्ण टि

गृहनिर्माणार्थं बृहत्क्षेत्रमस्ति इति चिन्तयन्तु। तदा कस्मिन् स्थाने गृहं निर्मातव्यमिति जिज्ञासा समुदेति। तदर्थं कश्चन उपाय एवास्ति खण्डीकरणविधिः। प्रायः वास्तुशास्त्रीयग्रन्थेषु खण्डीकरणविधिरिति नामाङ्कनं न दृश्यते किन्तु केरलेषु स्थापतय अमुं विधिं तन्नाम्ना शब्दापयन्ति। मनुष्यालयचन्द्रिकायां वास्तुविद्यायाञ्च खण्डीकरणे चतुःखण्डः षोडशखण्डश्चेति द्विधा क्रमः प्रस्तुतः। स एव विचारोऽत्र विस्तरेण निरूप्यते।

1. चतुः खण्डः— गृहनिर्माणक्रमे आदौ वास्तुशास्त्रोक्तविधिना भुवः परीक्षां विधाय तत्परिग्रहः कर्तव्यः। ततः परं शङ्कुस्थापनेन पूर्वापरदिशः ज्ञानं कर्तव्यम्। शङ्कुस्थापनया प्राप्तां पूर्वापरदिग्रेखां ब्रह्मसूत्रमिति तथा दक्षिणोत्तरदिग्रेखां यमसूत्रमिति च कथयन्ति वास्तुशास्त्रज्ञाः। तदुक्तं मनुष्यालय-चन्द्रिकायाम्—



चित्रम्-१

गृहनिर्माणक्षेत्रे शङ्कुस्थापनेन पूर्वापरदिशौ दक्षिणोत्तरदिशौ च क्रमशः प्राप्येते। तयोः स्पष्टावगमाय स्थपतिः सूत्रं प्रसारयति। अतः पूर्वापरयोः प्रसारितं सूत्रं ब्रह्मसूत्रमिति दक्षिणोत्तरयोः प्रसारितं सूत्रं यमसूत्रमिति च उच्यते।

एवं क्षेत्रस्य मध्ये सुविहितमिह यत् ब्रह्मसूत्रं तदाहु-
स्तन्मध्येऽन्योन्यमर्न्ततमपि रचयेत् वृत्तयुग्मं च धीमान्।
तद्योगात् तिर्यगुद्यज्झषजठरसुषुम्नाध्वना सूत्रमेकं
याम्योदग्गामि सूक्ष्मं रचयतु यमसूत्रं तदित्यामनन्ति॥[1] इति।

1. मनुष्यालयचन्द्रिका - 2अ. 5श्लो. - द्रष्टव्यं चित्रम् - 1

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

एते ब्रह्मयमसूत्रे चतुरश्रक्षेत्रं चतुर्धा समानाकारेण विभाजयतः। एवं सम्प्राप्ते चतुःखण्डे ईशान्यदिशि विद्यमानः खण्डः मानुषसंज्ञकः। नैऋत्यां दिशि विद्यमानः खण्डः देवसंज्ञकः। आग्नेयदिग्गतः खण्डः अग्निसंज्ञकः अथवा यमसंज्ञकः इति। वायव्यां विद्यमानः खण्डः वायुसंज्ञकः अथवा असुरसंज्ञकः।

इह प्राप्तेषु चतुःखण्डेषु देवमानुषखण्डौ अर्थादीशान्यनैर्ऋत्यखण्डौ शुभौ। तयोः स्थानयोः गृहनिर्माणाद् यथाक्रमं अभिवृद्धिः, इष्टप्राप्तिरिति फले भवतः। अतः तौ द्वौ खण्डौ ग्राह्यौ। तदुक्तं मनुष्यालयचन्द्रिकायां यथा–

धात्रीतलेऽब्ध्यंशिनि मानुषाख्यं गृहाभिवृद्धिप्रदमैशखण्डम्।
देवाह्वयं नैर्ऋतमिष्टदं स्यादुभे शुभे गेहविधौ नराणाम्।[2] इति।

यमखण्डे गृहनिर्माणेन मृत्युः जायते इति फलमुक्तम्। अतः तत्सर्वैर्वर्ज्यम्। असुरखण्डोऽपि दूषितत्वात् तत्त्याज्यम्। इदं स्थानं (असुरखण्डः) क्वचिद् वैश्यानां गृहनिर्माणाय युज्यते इति मनुष्यालयचन्द्रिकायाः उक्तिः। सामान्यतः एतदुभयं गृहनिर्माणार्थं निन्द्यमेव। अत्र मनुष्यालयचन्द्रिकाकारो यथाह–

आग्नेयखण्डं यमसंज्ञितं स्यान्मृतिप्रदं चाखिलवर्ज्यमेतत्।
वायव्यमप्यासुरसंज्ञितत्वान्निद्यं विशां क्वापि च गृह्यते तत्।[3] इति।



चित्रम्-२: चतुःखण्डः - गृहनिर्माणक्षेत्रस्याल्पत्वे चतुःखण्डविधिः आश्रियते। एतेषु चतुर्षु खण्डेषु मानुषदेवखण्डौ गृहनिर्माणाय योग्यौ।

2. मनुष्यालयचन्द्रिका – 2अ. 8श्लो. – द्रष्टव्यं चित्रम् – 2
3. मनुष्यालयचन्द्रिका – 2अ. 9श्लो. – द्रष्टव्यं चित्रम् – 2

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

2. षोडशखण्डः– पूर्वं चतुः खण्डः विहितः। तत्फलञ्च निरूपितम्। किन्तु चतुर्धा विभक्ते खण्डे ग्राह्यखण्डस्य विस्तृत्याधिक्ये सति अयं क्रमः समुचितः। प्रत्येकस्मिन् खण्डे समानाकारेण चत्वारः खण्डाश्चिन्त्यन्ते तर्हि एकस्मिन् चतुःखण्डे चत्वारः उपखण्डाः स्युः। तथा चतुःखण्डिते क्षेत्रे एकैकस्मिन् क्रमशः चत्वारस्तर्हि मिलित्वा षोडशोपखण्डाः उपलभ्यन्ते। आग्नेय्यां वायव्याञ्च विद्यमानौ यमासुरखण्डौ त्याज्यौ। अतः गृहनिर्माणार्थं षोडशखण्डेषु अष्टौ खण्डाः कथञ्चित्त्याज्यमेव। अवशिष्टे देवमानुषाख्ये खण्डद्वये अष्टौ उपखण्डास्सन्ति। उभयत्रापि ईशान्यनैरृत्यदिग्गतौ खण्डौ प्रशस्तौ। तन्नाम ईशान्यखण्डे ईशान्यनैर्ऋत्योखण्डौ, निर्ऋतिखण्डे निर्ऋतीशानोपखण्डौ शुभप्रदौ भवतः। तदुक्तं अज्ञातकर्तृकायां वास्तुविद्यायाम्–

अथवा समचतुरश्रं षोडशपदमेव कल्पयेत्क्षेत्रम्।
तत्र च नैरृतनिरृतौ मन्दिरमुदितञ्च दैविके खण्डे॥
निरृतावैशे कुर्यादीशेशानं तदुत्तमं स्थानम्।
मानुष्येऽपि च खण्डे निरृतिपदं वेश्मयोग्यमेव भवेत्॥[4] इति।?

विषयेऽस्मिन् मनुष्यालयकारोऽपि अमुमेवाभिमतं प्रास्तौत् यथा–



चित्रम्-३: षोडशखण्डः -

गृहनिर्माणक्षेत्रस्य विस्तृत्याधिक्ये अयं क्रमः आश्रियते। ऐशान्यखण्डे ईशान्यनैर्ऋयोपखण्डौ, निर्ऋतिखण्डे निर्ऋतीशानोपखण्डौ शुभप्रदौ भवतः।

4. मनुष्यालयचन्द्रिका – 5अ. 7श्लो. – द्रष्टव्यं चित्रम् – 3

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सूत्रे प्रागुदगग्रके क्षितितले कृत्वा चतुःखण्डिते
खण्डे कल्पयतु द्विजादिवसति शार्वेऽथवा नैरृते।
क्षेत्रे विस्तृतिरस्ति चेत्पुनरपि श्रुत्यंशते गृह्यते
शैवे नैरृतखण्डमेव निरृतौ शैवं शुभं चोभयोः।।[5] इति।

उपसंहारः—चतुःखण्डे षोडशखण्डे वा खण्डीकरणेन प्राप्तेषु शुभखण्डेषु गृहनिर्माणं शुभाय कल्पते। अशुभखण्डेषु वासगृहस्यैव त्याज्यत्वात् वासगृहान्तराणि वाणिज्योपकारकाणि भवनानि निर्मातुं शक्यन्ते।

साम्प्रतिककाले अल्पक्षेत्रेष्वेव गृहनिर्माणं प्रचलति। एवञ्चेत् वास्तुशास्त्रे एतस्य लाभः कः? इति प्रश्नः समुदेति। राजवीथीनां (Streets) पार्श्वे यदि गृहनिर्माणं कर्तुमिष्यते तदा अनेन विधिना वयं बहूपकृताः भवामः। यदि उत्तरदक्षिणगतो पूर्वपश्चिमगतो वा राजमार्गः तदा तत्र गृहनिर्माणं कर्तव्ये सति ईशाननिर्ऋतिखण्डयोरन्यतरे स्थाने गृहनिर्माणं क्रियते तर्हि शुभाय कल्पते। चित्रे यथा—

